सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

दशम उन्मेषः
द्वितीयो विलासः
१९७३
X 2
1973

साहित्य अकादेमी, नवदेहली

'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्गयां वा भात्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः वे. राघवः

सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

दशम उन्मेषः
द्वितीयो विलासः
१९७३
X 2
1973

साहित्य अकादेमी, नवदेहली

संस्कृतप्रतिभा दशम उन्मेषः, द्वितीयो विलासः
१९७३
साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका

सम्पादकीयम्

पद्यबन्धाः

१. सुभाषितानि-डा० वे. राघवः १०१
२. ऋतुमुखम्-डा० वे. राघवः १०६
३. एकाकी न रमते-डा० वे. राघवः ११०
४. अध्यात्ममञ्जरी-सुखमय मुखोपाध्यायः १११
५. 'गता स्नेहसरिता यदि शोषं सिकता तत्र सखे! मिलिता' -चन्द्रभानुः त्रिपाठी ११७
६. दाम्पत्यम्-धू. अर्कसोमयाजी ११८
७. मेघनवकम्-स्वयंप्रकाशशर्मा १२१
८. अहोरात्रम्-राधावल्लभः त्रिपाठी १२३
९. ज्योत्स्नामय्यां रजन्याम्-श्रीदुर्गादास गोस्वामी १२४
१०. हाली-प्रभाचार्यः १२६
११. विचित्रानुभूतिः-प्रभाचार्यः १२७
१२. "प्रतिसन्देशः"-म. ना. जोशी १२९
१३. लूता-डा. भास्कराचार्यः त्रिपाठी १३१
१४. चाटूक्तयः-वट्टिपल्लि मल्लिनाथ शर्मा १३२

गद्यबन्धौ—

१५. "अहो प्रमादः"-श. श्रीनिवासशर्मा १३३
१६. "हा हन्त हन्त विधिना परिवञ्चितोऽस्मि" डा. जि. रामा १३७

रूपके

१७. शूर्पणखाभिसारम्-डा. वीरेन्द्रकुमार भट्टाचार्यः १४१
१८. बंगलादेशविजयः-"पद्म" शास्त्री १६८

अनुवादाः

१९.	एडकः (श्री एकनाथीय भारुंड-गीतानि)-अनु० वि. के. छत्रे		१८०
२०.	संसारः-विभक्तेन भाव्यम्-अनु०	,,	१८१
२१.	निरग्रनासिका (अङ्गना)-अनु०	,,	१८२
२२.	देव्याः प्रियबलिः (रोडगा)-अनु०	,,	१८३
२३.	आदिमायायै-आवाहनं-प्रार्थनापूर्वकं, दुष्टसंहाराय प्रकटयितुम्-अनु०	,,	१८४
२४.	तुकारामस्य अभङ्गवाणी-गोविन्दः टेकाले		१८७
२५.	अधः पतनम्-चतुर्भुज ल० पूजारा		१८९
२६.	मधुसञ्चयः (विविधसूक्तिप्रकरानुवादः)-शै. सि. पाठकः		१९१

निकषोपलः—(पुस्तकविमर्शः)—

ऋग्वेदसंहिता सायणभाष्योपेता (वैदिकसंशोधनमण्डलम्); कृष्णयजुर्वेदीया तैत्तिरीयसंहिता (वैदिकसंशोधनमण्डलम्, पुण्यपत्तनम्); माध्यन्दिनसंहितायाः पदपाठः (युधिष्ठिरमीमांसकः); शुक्लयजुर्वेद-माध्यन्दिन-संहिता-तृतीयाध्याय-समन्वय-भाष्यम् (स्वामिगङ्गेश्वरानन्दाः); सामसारसर्वस्वम् (मायूरं रामनाथदीक्षिताः); गुरुकुलपत्रिका-वेदयोगाङ्कः (गुरुकुलविश्वविद्यालयः); सविता-सुपर्णाङ्कः (वेदसंस्थानम्, अजमेर्); वेदमन्दिरसमारोहः (नवदेहली); वैदिक साहित्य एवं संस्कृति (डा० निर्मला भार्गव); वैदिकसाहित्यम् (एस्. एन्. शर्मा); वाल्मीकिरामायणम् (वि. सीतारामय्य); गोपीगीतम् (गोविन्ददास् सेडमल् आसवानी); सांख्यकारिका (डा. ति. ज. मैङ्करेण संपादिता); प्रमाणलक्षणम् (ईश्वरन् नम्पूतिरिः, केरलविश्वविद्यालयः); गुरुपूर्णिमोपहारः (रामायणमुद्रणालयः, मद्रास्-४); न्यायवैशेषिकतन्त्रार्थसङ्ग्रहः (पण्डितराज वे. सुब्रह्मण्यशास्त्रिणः); सिद्धान्तशेखरः (विश्वनाथकृतः); भवभूतेर्महावीरचरितम् (आर्. आर्. अम्बर्देकर्); भैरवानन्दनाटकम् (मणिककविः); श्रीमत्सुनीति-भागवतम् (श्रीरामाचार्यः); शुकदूतम् (कविपण्डित श्रीहरचन्द्रकाव्यतीर्थः); विवेकानन्दचरितम् (गजानन पळसुळे); धर्मशीलतीर्थाटनम् अर्थात् श्रीकृष्णार्य-

तीर्थयात्राविजयः (श्रीवेङ्कटरामशास्त्री); सुमनोऽञ्जलिः (के. राजन्न शास्त्री); पूर्वभारतम् (श्रीप्रभुदत्तस्वामिकृतमहाकाव्यविमर्शरूपः-श्रीगङ्गेशदत्त-विष्णुदत्त-स्वयं-प्रकाशशास्त्रिभिः रचितः); पारिजातमञ्जरी (श्रीजगन्नाथ शास्त्री); गेय-गैर्वाणी (आ. वरदराजः); काव्यप्रकाशे चतुर्थोल्लासः (आर्. आर्. अम्बर्देकर्); अभिनवरससिद्धान्त (डा. दशरथ द्विवेदी); साहितीजगती (काल्रूरि हनुमन्तरावः); भारतीयकाव्यसाहित्यम् (ए. के. वार्डर्); केरलीयसंस्कृतसाहित्यकोशः (ईश्वरन् नम्पूतिरिः); भारतस्य संविधानं पद्यमयम् (एम्. एस्. दवे); संस्कृताशिक्षकम् (पं. गोपालशास्त्री); प्रारम्भिकरचनानुवादकौमुदी, रचनानुवादकौमुदी च (डा. कपिलदेव द्विवेदी); महत्तरं रामायणम् (डा० वे. राघवार्याः); संस्कृतवाङ्मवे ऋतुः (डा. वे. राघवार्याः); मलयमारुतः (डा० वे. राघवार्याः, राष्ट्रीय संस्कृतसंस्थानम्, नवदेहली); रघुवंशः (श्री. के. अनन्तपद्मनाभार्यः); कालिदासकृतिभ्यः अन्यैरुद्धृताः श्लोकाः (एन्. आर्. सुब्बण्णा); कालिदासविशेषाङ्कः (जम्मू विश्वविद्यालयपत्रिका); अलङ्कारशास्त्रसंबद्धान् कांश्चित् विषयानधिकृत्य विरचिता विमर्शात्मकनिबन्धाः (डा० वे. राघवार्याः); बंगला-देशः (डा. रामेश चन्द्र शुक्लः); सुबोधसंस्कृतम् (श्री रसिकलाल् ए. पारेख्)

सम्पादकीयम्—

सर्वराष्ट्रीयसंस्कृतानुशीलनसङ्घः

पूर्वस्यां सञ्चिकायाम् इदंप्रथमतया १९७२-वर्षे देहल्यां सञ्चालितं विश्वसंस्कृतसंमेलनमधिकृत्य लिखितम्। तस्मिन् महासंमेलने अन्तिमे दिने अङ्गीकृतेषु निर्णयेषु मुख्यमेकमधिकृत्य प्रमोदावहं कमपि फलोदर्कमारम्भमद्य निवेदयितुमिच्छामि । देहलीनिर्णयेषु एकः संस्कृताध्ययनस्य सर्वदेश-विद्वत्साहचर्येन सर्वेषु देशेषु प्रचारार्थं तदुपायान् क्रियामार्गांश्चायोजयितुं सर्वराष्ट्रीयसंस्कृतानुशीलनसङ्घः कश्चन स्थापयितव्य इति । एतं निर्णय-मनुसृत्य गते वर्षे (१९७३) जूलै-मासे किमपि साधितम्। पारिस्-नगरे यदा सर्वदेशीयप्राच्यविद्यापरिशोधनपरिषदः २९-तममधिवेशनमभूत्, तदानीं संमिलितैः संस्कृतविद्वद्भिस्तत्तद्देशीयैर्मिलित्वा तादृशी सर्वराष्ट्रीयसंस्कृत-परिषद् (International Association of Sanskrit Studies) एका स्थापिता, यस्याः संस्कृतप्रतिभायाः संपादकोऽध्यक्षो निर्वाचितः ।

अस्यां परिषदि अङ्गत्वं लब्धुं प्रतिराष्ट्रं शासकीयसंबन्धं विना संस्कृत-कर्मणि याः संस्था वर्तन्ते तैस्संभूय एका तत्तद्राष्ट्रीयसंस्कृतपरिषद् घटयितव्या। सर्वेष्वेव राष्ट्रेषु संस्कृताभिवृद्धये अनुसन्धान-मातृकासंग्रहण-प्रकाशन-प्रचारादि-कार्य-परिपाटीप्रवर्तनाय च यदपेक्षितं प्रोत्साहकं द्रव्यसाहाय्यं तत् 'युनेस्को'-समितिसकाशाद् अनया सर्वराष्ट्रीयसंस्कृतपरिषद्-द्वारा लब्धुं शक्यते । अतोऽस्याः कार्यक्रममुपकर्तुं भारतेऽपि तत्र तत्र वर्तमानाभिः संस्कृतसंस्थाभि-रेकीभूय भारतीयसंस्कृतपरिषदेकाचिरेण आरचयितव्या, यया विश्वसंस्कृत-परिषदोऽङ्गभूतया भारते तत्तत्संस्कृतकार्योपयोगीनि साधनानि सम्पादयितुं शक्यते । अद्यावधि अध्यक्षभूतानां प्रतिभासम्पादकानामभ्यर्थनामनुरुध्य उपविंशतिसंख्याकाः संस्कृतसमितयोऽस्मिन् देशे स्वसंमतिमङ्गत्वशुल्कं (५०-रूप्यकं) च दत्तवत्यः । अन्याभिरपि समितिभिरेवमेव प्रार्थिताभिः

शीघ्रमेव अङ्गत्वाङ्गीकाररूपं साहचर्यं प्रदर्शयितव्यमिति भूयोऽपि ताः प्रार्थये ।

* * *

संस्कृताध्ययनावश्यकतां प्रति क्रैस्तवमताचार्यः

गते अक्टोबर्-मासे नवरात्रिसमये तिरुवनन्तपुरे संस्कृतसंमेलनमेकं प्राचलत् । परःशतं संस्कृतज्ञास्तत्र संमिलिताः । संमेलनस्य चरमाधिवेशने तिरुवनन्तपुरस्थः क्रैस्तवमतप्रधानगुरुरेवमभाषत-'अद्य विद्याशालासु छात्रक्षोभ-रूपो व्याधिः प्रसृतो दृश्यते; अस्यैकमेवौषधम् वर्तते; तच्च संस्कृताध्ययनमेव । भारतीयपुरातनसंस्कारपरम्पराया संस्कृतमेकमेव प्रतीकभूतं प्रकाशते । यदि समीचीनतया सुभिक्षसंपन्नतया चायत्यां भारतं देशमभिवर्धयितुमिच्छामो, तदा तत्र मूलभूतं संस्कृतपारम्पर्याख्यं बीजमभिवर्धनीयम्' इति ॥

* * *

आकाशवाण्यां संस्कृतवार्ता

आकाशवाण्यां प्रसार्यमाणेषु कार्यक्रमेषु इतः परं संस्कृतभाषयापि दैनन्दिनिकवार्तासारः श्रावयितव्य इति यो निर्णयोऽभ्युपगतोऽधिकारिभिः स परं प्रहर्षाय भवति । संस्कृतविषयकाणि भाषणानि अद्य प्रायः संस्कृतेतर-भाषाभिः आङ्ग्लभाषया वा, मातृभाषया वा क्रियन्ते ; इतः परं यावच्छक्यम् एतानि व्याख्यानानि संस्कृतभाषयैव कार्याणि इत्यपि यन्निर्णीतं तदपि प्रशस्यः प्रारम्भः । जर्मन्-देशे आकाशवाण्यां संस्कृतभाषणं नियमेन भवत्येव ; तत् किमर्थं भारते न भवितुमर्हति ?

* * *

वेद-भगवान्

महनीयमहिम्नां श्रीमतामाचार्याणां गङ्गेश्वरानन्दानां नाम, तैस्साधितं कार्यं च संस्कृतप्रपञ्चे भारतीयसंस्कृतिप्रपञ्चे च सर्वेषामेवास्तिकानां सम्यक् विदितमेव । अतिबाल्य एव तैर्नष्टनेत्रैः कथं वा वेदेषु शास्त्रेषु च

इयत्तुमहत् पाण्डित्यं श्रवणधारणशक्त्यैव साधितमिति आश्चर्यावहमिदम् । तेषां पण्डितपामरशिष्याः परस्सहस्रं वर्तन्ते । सर्वभारतव्यापी, विशिष्य उत्तरभारते सुतरां प्रकाशमानस्तेषां प्रभावः, यद्द्वारा तैः उत्तरभारते तत्र तत्र बहवः स्वशिष्याधिष्ठिता आश्रमाः स्थापिताः ।

संस्कृते सरलमर्थगाम्भीर्यसंपन्नं च यत्तैर्व्याख्यानं क्रियते तत्संस्कृतलोकं सर्वमेवावर्जयति । संस्कृते या एतेषां श्रद्धा ततोऽप्यतिशायिनी चेतेषां श्रद्धा क्वापि, सा नूनं वेदेषु इति वक्तुं शक्यते ।

यथा सिख्-पथमनुसरद्भिः 'ग्रन्थ-साहेब्' इति नानकादीनां तदाचार्याणां गीतपुस्तकं देवतात्वेनाराध्यते, एवमेव भारतसिद्धान्तानां सर्वेषामेव मूलभूतानां वेदानां पुस्तकं कथमस्माभिः न पूज्यत इति कृत्वा एतैः श्रीगङ्गेश्वरानन्दैः एकस्मिन्नेव बृहति संपुटे चतस्रो वेदसंहिताः स्थूलैरक्षरैर्मुद्राप्य, प्रकाश्य, भारते तत्र तत्र मुख्येषु क्षेत्रेषु तथा संस्कृतविद्यास्थानेषु अन्यासु च संस्थासु पूजाराधनार्थं प्रतिष्ठाप्यते । अद्ययावत् तैः दक्षिणदेशे मद्रनगर्यां बहुत्र, काञ्च्यां, चिदम्बरे, तञ्जावूर्-सरस्वतीमहल्-पुस्तकालये, रामेश्वरे, गुरुवायुपुरे एवमन्यत्र च 'वेद-भगवान्' इति दत्ताभिधेयमिदं पुस्तकं प्रतिष्ठापितम् ॥

*   *   *

माक्स् मूलर्

पाश्चात्यदेशे अतीतासु तिसृषु शताब्दीषु बहवस्संस्कृतप्रवीणा रेजुः, तथापि तेषां मध्ये अनितरसाधारणा प्रख्यातिरासीद् 'माक्स्मूलर्' इति विश्रुतस्य संस्कृतविदुषः । जर्मन्-देशाभिजनेन तेन प्रायइङ्ग्लान्द्-देशे आक्स्फोर्ड्-नगरे उषित्वा बहु बहु संस्कृतप्रचारकार्यं साधितम् । तस्य

संस्कृतसेवायां मुख्यभूतमिदं यदिदंप्रथमतया तेन सायणभाष्येन सह ऋग्वेदसंहिता संपूर्णा महता प्रयत्नेन श्रमेण च मुद्रिता । संस्कृतमूलग्रन्थानुवादः, संस्कृत-साहित्यस्य दर्शनानां च वर्णनम्, 'भारतात् संस्कृतविद्यातश्च किमस्माभिः ज्ञातुं शक्यते' इति तदुल्लेखनेनाविश्रान्तं संस्कृतसेवा निर्वर्तिता । तस्य यत् भारते प्रेम, संस्कृतविद्यायां च योऽभिनिवेशः, तत आकृष्टा भारतीया तस्मै 'मोक्षमूल' इति संस्कृतं नाम दत्वाऽभ्यनन्दन् । ततः समीचीनमेवेदं यद् भारते तत्र तत्र तस्य जन्मनः सार्ध-शताब्दी-महोत्सवः जर्मन्-दूतावासेन तदन्तर्भूतमाक्स्-मूलर्-भवनैश्च भारतीयशिक्षामन्त्रालयेन सह संभूय गत-डिसम्बर्-मासारम्भे उद्घोषितः । जर्मन् - देशादागतैः थीमे-प्रभृतिभिः संस्कृतप्राचार्यैः, भारतीयसंस्कृतप्राचार्यैश्च तदानीं माक्स्-मूलर्-महाशयं, तत्कृतानि कार्याणि तत्प्रकाशितां ग्रन्थांश्चाधिकृत्य व्याख्यानानि कृतानि ।

'भारतात् किमस्माभिरध्येयम्?' (India - What It can Teach Us) इति तदीये व्याख्याने स माक्स् मूलर् संस्कृतं तत्सम्बन्धेन भारतं चाधिकृत्य यदाह तदत्रास्मिन्नवसरे मन्ये उद्धरणार्हं भवति-"अहमिदं दृढं विश्वसिमि, भवतामपि विश्वासमत्रोत्पादयितुमाशंसे च, यद् संस्कृतसाहित्यं यदि समीचीनेन मनोभावेन अधीयेत, तदा ज्ञायेत, एतत्साहित्यं मनुष्यैरवधेयैः विषयैः परिपूर्णं, ग्रेकूभाषातः कदाप्यनधिगम्यानुपदेशान् पूर्णं बिभर्ति च । .....ग्रेकानां, रोमकानां, सेमिटिक्-जातिषु अन्यतमानां यूथानां च भावनाभिरेव केवलमभिवर्धितैरस्माभिरत्र ऐरोपीयैः कस्मात् वाङ्मयात् स न्यूनतापूरकोऽत्यन्तापेक्षितो गुणविशेषो ग्राह्यः, येनास्माकमान्तरमाध्यात्मिकं जीवनं चतुरश्रतरं भवेत्, व्यापकतरं भवेत्, विश्वजनीनतरं भवेत्, यथार्थतो मानवोचितं च भवेत्,-न केवलमस्मा ऐहिकाय जीवनाय, किन्तु परिष्कृताय सनातनाय जीवनाय - यद्येवमहमात्मानमेव पृच्छेयं,-तदा पुनरप्यहं भारतदेशमेव अङ्गुल्या निर्दिशेयम्" इति ॥



माक्स् मूलर् (१८२३ - १९००)

प्राख्यातः संस्कृतविद्वान् भारतीयसंस्कृत्यभिमानी, ससायणभाष्याया ऋग्वेदसंहितायाः प्रथमप्रकाशयिता, ५०- सम्पुटात्मकप्राच्य-अध्यात्मग्रन्थमालायाः सम्पादकः प्रकाशकश्च

Courtesy, Max Muller Bhavan, Madras

सुभाषितानि

वे. राघवः

यदैव जायते देही तदैव ननु मानवः ।
जायते देहि देहीति याच्ञालाघवयामलः ॥

*

निरपेक्षा वयं यावत् तावदेव स्वतन्त्रता ।
तावदेवाभयं सौख्यं तावदेव मनस्विता ॥
यदा त्वपेक्षते किंचित्तदैव न्यूनतागता ।
धृतिच्युतिर्वचोदैन्यं गजतुल्योऽप्यजायते ॥

*

दूर्वाभोग इवोद्यानं पानकं शीतवारिवत् ।
निजकान्तोपमा नारी नैवास्ति रसवेदिनाम् ॥

*

मोक्षः प्राप्तव्यकाष्ठान्ते साधनं धर्म आदिमः ।
रक्षितव्योऽर्थकामौघः तत्कूलद्वयमध्यतः ॥

*

यदि बुक्कति पूर्णेन्दुं वीक्ष्य श्वा, का ततः क्षतिः ।
इन्दोस्सुधायाः, स श्वैव शिलाभिस्ताड्यते जनैः ॥

*

प्रत्यक्षं च प्रकाशं च स्तवनं नैव शस्यते ।
परोक्षं व्यञ्जना चेति निन्दायामपि निन्द्यते ॥

*

अत्याधिक्यं न कर्तव्यं सर्वमेव विनश्यति ।
अतिकामादर्धनारेः वक्त्रेक्षापि शिवस्य न ॥

*

दरिद्रमुग्धचेष्टां च जातिवैरूप्यमङ्गके ।
यद्धसन्ति नरा देव तन्मे मर्माणि कृन्तति ॥

*

अव्याजमित्रहसितः शिशुना छलितश्च यः ।
अमर्षमुपयात्येष तुच्छसत्त्वः स किं नरः ॥

*

विप्रकर्षेऽतिसुमुखा विरसाः सन्निकर्षतः ।
अर्थकृत्रिमभावाश्च वेशयोषा हि बान्धवाः ॥

*

प्रासं धनं स्त्रियं निन्दत्याम्ला द्राक्षेतिवद् जनः ।
संभवश्चेत् स दुर्भाग्यः नूनं शक्त्या यतिष्यते ॥

*

प्रकृत्या भावहीनां च प्रसादरहितां मुहुः ।
वेश्यां कुकविवाचं च साहसी कोऽपि सेवते ॥

*

ब्राह्मे मुहूर्ते बुध्वापि कुर्वताकालसाधनम् ।
प्राप्येत किन्तु काकेन पिकपञ्चममाधुरी ॥

*

सहजातास्ते कापि
  कापि विशीर्णाः, न दर्शनं चापि ।
कैरपि कैरपि मिलिता
  वयमस्मिंस्तुमुलजगदब्धौ ॥

*

यथा हि संपुष्पितवृक्षगन्धः
  स्वयं सुदूरं प्रसरीसरीति ।
तथा गुणो मे निजकर्मकर्तुः;
  किं तत्तदालोकनसेवनाद्यैः ॥

*

पादान्तिके पतितमाम्रफलं न तावद्
  आरोहतीह हृदयं पुरुषस्य यावत् ।
स्कन्धाग्रलम्बि बहुभृङ्गपिपीलिकादि-
  घाटीव्यथा अननुभूय च यन्न लभ्यम् ॥

*

रूक्षात्मा यदि तस्य नैव भविता स्वप्नेऽपि नश्चिन्तनं
  सौम्यात्मा यदि सर्वथा स, भुवने स्वर्गान्तरं कास्ति नः ।
उज्ज्वालो दहनः क्षणं, क्षणमहो शैत्योरुकम्पप्रदो
  नीहारः, कथमीदृशा परिचयाभ्यासोऽस्तु नो विद्महे ॥

*

आधारो भवनस्य या हि रचना सा नो बहिः प्रेक्ष्यते
यन्नाशे द्रुम एव नश्यति, तदप्युर्व्यन्तरेवास्ति हि ।
रत्नत्वं च यदश्मजातमुपयात्येतच्च भूगर्भगं
सारोऽर्थश्च न याति स प्रकटतां लीनः कवेरुक्तिषु ॥

*

या आपः परिपोषयन्ति, विततं नाशं वितन्वन्ति ता
ओघीभूय; य एव पाककृदसावेवानलो दाहकृत् ।
प्राणात्मैव मरुत् प्रभञ्जनदशो वात्यात्मना ध्वंसकः
नैकान्तं गुणदोषता, तदुचितं ग्राह्यं विनैवाग्रहम् ॥

*

मा भूद् बुद्धिरसौ भवेद्यदि तदा मा भूद् दरिद्रं गृहं
तच्चेन्मास्तु मनोरथो बहु स चेन्मा मास्तु संवेदिता ।
सा चेन्मा सुकुमारता यदि च सा किं हन्त कुर्याद् भवान्
शाठ्यं चेन्न, न चेच्च मौढ्यमथवा, सद्योऽस्तु मृत्युस्तव ॥

*

यत्सेवोपनिषत्सु नास्ति पटिमा किं व्यर्थकार्यश्रमैः
आत्मोद्घोषणधाष्टर्यसाहसकला नो चेत् किमाशंसनैः ।
नाभ्यस्ता यदि चाटवः प्रभुमुदे, विद्यास्वलं मेधया
वित्तस्यारभटी न चेत् किमु गुणैरन्यैरशेषैरपि ॥

*

अत्रैको दयितोपवीणनगतस्वान्तः, परत्राप्यसौ
पाताय स्वजनस्य मार्गमभजन् कण्डूयते स्वं शिरः ।
एवं हन्त नृसृष्टिरित्यहमिह श्वासावमुक् कश्चन
त्वं चापीश्वर हेलकः—प्रहसने तेऽस्मिन् रुचिः का प्रभो ॥

*

स्थैर्यं ददातु पृथिवी परिशुद्धिमापः
वर्चोऽनलोऽपि गतिलाघवमाशुगश्च ।
वैशाल्यमम्बरमिमानि महान्ति पञ्च
भूतानि मां प्रगुणयन्तु निजैर्विशेषैः ॥

*

न दुःखं नानन्दो भवति, भवितव्यं हि भवती-
त्यसौ व्यर्थः पुंस्त्वप्रकटनपटाटोप इति च ।
चिरात्तत्तद्वस्तुव्यतिकरपरीक्षाकतकतो
विपङ्का नः प्रेक्षा प्रशममयते देवशरणा ॥

ऋतुमुखम्

३. राघवः

१. वसन्तकन्या

अद्याप्यनुद्भिन्नसुमामपीमां
  विलोभयन्तीं कलिकाभिरेव ।
उपेयिवानेव वसन्तकन्यां
  गृह्णन् मुखे चुम्बति पुष्पबाणः ॥

पुष्पितैस्तरुभिः

पुष्पितैस्तरुभिर्भाति वियदुल्लोचिता, तया ।
स्पर्धयेव मही भाति सकुथा पतितैस्सुमैः ॥

२. त्रिमूर्तीनां च भीषणः

अजोऽम्बुजान्तरब्ध्यन्तर्विष्णुरीशो हिमालये ।
वसन्ति नित्यं, ग्रीष्मोष्मा त्रिमूर्तीनां च भीषणः ॥

३. ऐन्द्रं धनुः

वेद्धुं जनमनांस्यद्य नालं कामस्य किं धनुः ।
यदैन्द्रं धनुरप्युच्चैर्व्यात्तं वज्रस्वनं पुरः ॥

सधूमाङ्गारकूटाभाः

शिखरेभ्यः प्रसर्पद्भिरमीभिर्मेघमण्डलैः ।
सधूमाङ्गारकूटाभा दूरे नीलाचला इमे ॥

कल्माषमिदं नभः

कनत्तडित्कार्मुकराजि मेघकालिम्नि कल्माषमिदं नभस्तत् ।
वनं स्फुरन्नीपकदम्बमालं कलापिबर्हश्रि रुचानुयाति ॥

वेल्लन्ति वारिवाहाः

प्रायाणिका इव सुदीर्घपथे चरन्तः
  सांग्रामिका इव रणाभिमुखं व्रजन्तः ।
ऊर्ध्वोर्ध्वमूर्मय इवांबुनिधौ लुठन्तः
  वेल्लन्त्युदङ्मुखमितो दिवि वारिवाहाः ॥

लुलन्त्यङ्गकानि

कादम्बिनीश्यामलितान् दिगन्तान्
उद्बुद्धपुष्पोत्पुलकान् कदम्बान् ।
निध्यायतो निःशरणीकृतानि
लुलन्ति मे वस्त्रवदङ्गकानि ॥

नार्यो धावन्ति

पाथस्तुन्दिलितोदरा जलधराः, सर्वा दिशः श्यामलाः
श्वासाध्मातमिदं च भावुकमनः कल्माषितं क्रन्दति ।
चञ्चन्त्यः पतिता इवात्र तडितो नार्यश्च वेलातटे
धारासारहताकुलाङ्गलतिका धावन्ति चोच्चावचम् ॥

शब्दब्रह्म चण्डविवर्तमाप्तम्

स्फुटन्नभःस्फूर्जथुभिः, प्रमूर्च्छज्झञ्झाभिरुर्वीरुहशीत्कृतैश्च ।
चीत्कारिवर्षैश्च विभाति शब्दब्रह्माधुना चण्डविवर्तमाप्तम् ॥

४. कादम्बिन्यः कोणे

गतवर्षा बत शिथिलाः शुष्काः शुक्लाश्च लाघवं गमिताः ।
कादम्बिन्यः कोणे नष्टरसाः सादमायान्ति ॥

अंशुकवत्पयोदाः

वर्षोत्तमालिन्यघना विधौता
निरम्बु निष्पीड्य विधूय खेऽद्य ।
शरद्रजक्या तप एधमाने
प्रश्यन्त एतेंऽशुकवत्पयोदाः ॥

हंसस्य दिव्यो द्विजः

निर्याते घनडम्बरे बककुलकैङ्कारितेऽस्तंगते
विश्रान्ते घनपाठिभेकसमितेः कण्ठे कठोरोत्कटे ।
कालुष्यापगमप्रसीददवलोक्यामन्दमृद्वञ्चितं
सर्पन्नम्बु निषेवते विमलभाः हंसस्य द्विव्यो द्विजः ॥

विलीनपद्मकोशाः

वर्षाम्बुपूरितसरस्सु विलीनपद्म-
कोशा इमे तत इतोऽप्युदयच्छिरोभिः ।
स्पन्दन्त उन्मिषति भानुमति प्रवुद्ध-
विष्णवक्षिवन्नवभवोदयिलोकतुल्याः ॥

५. शिशिरपवनवीचेः स्पर्शः

जनयति पुलकं नः प्रौढमङ्गेषु कम्पं
शयनगमनचिन्तां सत्वरं चत्वरान्तः ।
शिशिरपवनवीचेः स्पर्श एषोऽस्मदङ्गे
विकृतिमिव मृगाक्ष्या अर्पयत्यद्य काञ्चित् ॥

कालोऽयं हैमनः

कालोऽयं हैमनः स्त्रीणां विदार्याधरबिम्बिकाम् ।
कियान् रागोऽन्तरस्तीति परीक्षत इवाधुना ॥

६. इयमपरा श्रीः

वर्षासु रम्या यदि नव्यधारा-
पातास्तथैवोत ततोऽपि रम्याः ।
हिमात्यये नूतनतोन्मुखेभ्यः
तरुभ्य आपाण्डुदलावपाताः ॥

आमूलनिर्गलितपल्लवपुष्पभारैः
   कांचिच्छ्रियं क्षितिरुहे मधुरादधाति ।
शाखावशेषतरुभिर्गगनेऽद्य रेखा-
   चित्रैरिवेयमपरा शिशिरात्यये श्रीः ॥

ऋतुसन्धिः

नाद्यापि शीतशितता मुञ्चत्यनिलमौषसम् ।
खरो भवितुमर्कोऽपि मन्थरो मसृणारुणः ॥

हिमप्रलयकालातिवाहिनः स्थावरा द्रुमाः ।
अन्तःप्रत्याहृतरसाः शाखाशेषा ऋषिप्रभाः ॥

उन्मीलत्पत्रकुसुमशबलाश्च क्वचित् क्वचित् ।
माधवप्रतिसर्गाग्रलक्ष्मलक्ष्म्या चकासति ॥

'एकाकी न रमते'

वे. राघवः

पूर्णेऽपि सौध इह सौधकरे न पूर्णं
चेतोऽत्र निःश्वसिति किञ्चन मार्गतीव ।
विश्रान्तिदायिनि च वारिधिसैकतेऽत्र
शून्यं मनो भवति,-शून्यमिदं हि पार्श्वम् ॥ १ ॥

चारूण्यमूनि कुसुमानि न वल्लरीषु
चारूणि बम्भरकचेषु कृतार्थितानि ।
आत्मैव सर्वगुणशाल्यपि न प्रियोऽसौ
नूनं परप्रियतया हि स च प्रियो नः ॥ २ ॥

अध्यात्ममञ्जरी

सुखमय मुखोपाध्यायः

१. जयति पथिकः

गाढं निशीथस्य तमो वितीर्णं
गात्रेष्विव स्पर्शवदन्धमक्ष्णोः ।
शैत्यं च वाताहतमस्थिकम्पं
ज्योतिस्सु मेघान्तरितेषु भूयः ॥ १ ॥

ज्वलन्ति ताराः स्तिमितप्रकाशा-
श्चन्द्रोऽपि दूरं जलदैरदृश्यः ।
न रश्मिरेकोऽपि घनान्धकारं
भिनत्ति तेषामिह गूढवर्णः ॥ २ ॥

घोरं वनं भूमिषु लब्धजन्म
प्रवर्षसिक्तासु तनुप्रचारम् ।
पदे पदे सम्प्रति भान्ति कूरा-
श्चरन्ति हिंस्राश्च करालदंष्ट्राः ॥ ३ ॥

अलं विषादेन फलं न दृष्ट-
माक्रन्दितानामपि सुस्वराणाम् ।
नास्तं तमः सिञ्चति हन्ति वेदं
ज्योतिर्दहत्युग्रविलोचनोत्थम् ॥ ४ ॥

प्रचण्डमन्युस्थिरसारसिक्तं
चेतःप्रदीपं क्षणगूढभासम् ।
प्रज्वालय ज्योतिरमुष्य दीप्त-
मक्ष्णोर्विसर्पि प्रणिहन्तु विश्वम् ॥ ५ ॥

तेजोविशेषज्वलितोग्रनेत्रो
निःश्वासमार्गेन विसार्य तेजः ।
प्रत्यङ्गरन्ध्रं च सुतीव्रदाहं
तेजोमयस्तिष्ठ विकीर्य तेजः ॥ ६ ॥

तेजोविदीर्णाम्बुधरोपरोध-
स्तेजोज्वलन्मण्डलचन्द्रतारः ।
तेजोविशीर्णातुरवातशैत्य-
स्तेजोमयः साधय तेजसैव ॥ ७ ॥

तेजःप्रदग्धाखिलदावभूमि-
स्तेजःप्रशुष्काम्बुसमानकूपः ।
तेजोहतप्राणविदंष्ट्रहिंस्र-
स्तेजोमयः शाधि च तेजसैव ॥ ८ ॥

२. आत्मविजयः

किमिव किमिव दैवं नैव जानामि शश्वत्
किमपरमथवा मे तेजसः स्तम्भमूलम् ।
कृतमपि कथमेतज्जीवितं यस्य हेतो-
र्विफलमखिलमासीत् सर्वयत्नाभिरामम् ॥ १ ॥

अथ बलपरिहीनो योगसन्त्यागयोगात्
स्फुटमिह गणनायां नूनमात्मैव वाच्यः ।
तुमुलसमरलाभो यत्र लाभो जयस्य
कथमपि यदि हन्यादात्मनात्मानमेव ॥ २ ॥

३. किं कारणम् ?

ग्रहा यदि स्युर्मम दुःखकारणं
कथं विरुद्धाः खलु ते ग्रहा मम ।
अथ ग्रहाणामपि हेतुरीक्षितः
स किंस्वरूपोऽथ किमस्य वारकम् ॥ १ ॥

यदीश्वरो मूलमिति स्थितिं श्रये-
स्तदिच्छया प्राग्विहितं कुतोऽन्यथा ।
प्रसिद्धयोस्तेन शुभाशुभार्थयो-
रसाध्यतायां पुरुषस्य का गतिः ॥ २ ॥

तथापि तुष्येद्भजनेन वत्सलः
परः पुमानित्यनुसंहितो नयः ।
परप्रयत्नाश्रयकामताप्तये
प्रकल्पतेऽस्येश्वरभावदूषकः ॥ ३ ॥

४. "योगः कर्मसु कौशलम्"

मौनं विविक्तं परिचिन्तनं च
मूलानुसन्धानमसत्प्रवृत्तेः ।
सोपायसाध्यस्य विनिश्चयोऽन्तः
शश्वन्महत् पौरुषजीवितं च ॥ १ ॥

कालस्तावत् कुटिलचरितः सोऽयमाश्चर्यवीर्यः
कुर्यामेतत् श्व इति कुमतेर्वञ्चनावैरिमुख्यः ।
अद्यैवास्मिन्नपि च समये साधयाम्येष सज्ज-
इत्यानेयो वशमतिबलाद्दीर्घसूत्रं विसृज्य ॥ २ ॥

क्लैब्यं रक्षः शयितमपरं घोरमुत्साहदेहे
तस्यैवायं सुहृदुरुतमा गूढतेजाः प्रमादः ।
अस्त्रैः कृत्वा बलवदवशं यो विषादाभिधानै-
र्विस्मृत्या च स्वमतिसुभगंमन्यमानं निहन्ति ॥ ३ ॥

तत्रात्मानं प्रमृतगहनादात्मनोत्थाप्य सद्यः
स्मृत्या स्नेहात् प्रणयिविहिताच्चैव सम्भावितेन ।
धृत्युत्साहोत्तरमनुपमं पौरुषं सर्वशक्त्या
शश्वत् कार्यं शरणमचिरात् तेन शत्रुर्हतोऽसौ ॥ ४ ॥

५. कामवृत्तम्

एतावदत्यायतकामवृत्तं
हृतोऽस्मि येन स्वजनाद्विदूरम् ।
असौ यदा मुञ्चति मेऽश्रु गूढं
प्रमादलोलो व्यसनैस्तदाहम् ॥ १ ॥

स्निग्धो जनो मय्यनुरागदैन्याद्
मत्प्रेयसि प्रत्ययवानतीव ।
तरुर्न जानाति निजप्रसून-
मधःपतिष्यत् सुभगप्रकाशम् ॥ २ ॥

प्रसूतिकालावसरे कुतोऽयं
दुर्वातवेगः सुरपादपस्य ।
कामोऽथवायं भृशदुर्निवार-
स्तत्र स्वतन्त्रः पुरुषस्य वाच्यः ॥ ३ ॥

स्वतो विवस्वान् गगनेऽभ्युदेति
पुष्पाणि वृक्षेषु च रागवन्ति ।
मधूनि पुष्पेष्वपि तानि भूयः
स्वादूनि हर्षाद्भ्रमराः पिबन्ति ॥ ४ ॥

कामस्तथैवाभ्युदयात्मना मे
प्रादुर्भवत्वात्मनि जीविते च ।
कामेन कामं विनिहत्य कामं
जीवाम्यहं प्रेष्ठजनैः सहैव ॥ ५ ॥

६. दैवपुरुषयोगः

कृपात्मदैवामृतबिन्दुमात्रं
क्षिप्रं महात्मन् मयि पातय त्वम् ।
क्षरन्ममास्मिन् प्रमृतस्य जीविते
यः पौरुषत्वेन फलिष्यति ध्रुवम् ॥ १ ॥

तत्पौरुषं मानवजीवितस्य
महाफलं सर्वफलोदयोदयम् ।
तेनैव लब्ध्वा पुरुषार्थसार्थं
स्वार्थाभिधानं पुरुषत्वमाप्नुयाम् ॥ २ ॥

इत्थं च दैवादथ पौरुषान्मे
संछिद्य तत्तत् प्रमृतं बलेन ।
जीवाम्यहं पौरुषभूषणः सन्
जीवामि शश्वन्निजजीवितेशः ॥ ३ ॥

७. मृत्योरपि जीवितम्

सम्भावयाम्यहमसम्भवशब्दयुक्तं
दुःखं न मे किमपि यद्यपि नष्टलक्ष्यः ।
अन्ये वदन्तु पतितस्य समुत्थितं न
जानाम्यहं तु मरणादपि जीवितः स्याम् ॥ १ ॥

यत्नः सदा मम सुदुष्करकार्यसिद्धौ
तेनैव जीवितमिदं महनीयमस्तु ।
कृष्णस्य तस्य कृपया परया ध्रुवं तत्
संसाधयामि यदसाध्यमहो परेषाम् ॥ २ ॥

न जातु सन्तो न पथः स्खलन्ति
भूयः स्खलन्तस्तु पथैव यान्ति ।
स्मृतो हि पन्था दृढपौरुषस्य
न भीरवस्तेन पथा चरन्ति ॥ ३ ॥[1]

यदि जीवामि जीवामि यथा जीवति मानवः ।
अन्यथा मां ध्रुवं हन्मि धिङ् नरं पशुजीवितम् ॥ ४ ॥

जीवामि जीवामि यथैव मानवो
जीवामि नैवं प्रलपन्ननेकशः ।
जीवामि हत्वा पशुजीवितं बला-
ज्जीवामि जीवामि यथैव मानवः ॥ ५ ॥

---

१. शर्मण्यमहाकवेः गेठे इत्याख्यस्य कस्यापि पद्यस्यानुवादोऽयम् ।

उद्योगमात्रं बलमस्तु नान्यत्
तत्रास्ति कृष्णस्य कृपोपकर्त्री ।
तेनैव सिद्ध्येत् प्रमृतप्रमोक्ष-
श्चन्द्रोदयेनेव तमःप्रणाशः ॥ ६ ॥

६. मृत्युर्नास्ति

घोरं मृत्युं घोरस्वान्तच्छायालीनं
तीर्त्वा जीवेन्नैव ज्ञानज्योतिर्वर्जम् ।
ज्ञात्वाप्येतन्मूढो नायं जानातीव
चक्षुर्भूयः कामान्ध्येनैवान्धीकुर्वन् ॥ १ ॥

घोरः श्वासो घोरं चास्रस्रोतः स्फीतं
घोरा चिन्ता घोरे जाते सर्वस्वेऽस्मिन् ।
घोरायस्व त्वं मे सद्यः सङ्कल्पेति
वार्त्ता नास्ति स्वार्थावाप्तौ कीदृग् यत्नः ॥ २ ॥

नैतच्चित्रं प्रेक्षे ह्येतच्चित्रारूढ-
मित्याशास्ते घोरंमन्यत्वेनाप्येषः ।
जाल्मो नूनं दम्भोद्भेदध्वस्तायासो
हेतुं ब्रूयात् शश्वन्मोहाविष्टः कष्टम् ॥ ३ ॥

घोरं जातं घोरध्वान्तप्रायप्रोतं
छित्त्वा तावद् घोरं वीर्यं प्रादुष्कुर्वन् ।
घोरे व्योम्नि व्याघूर्णद्भिर्ज्योतिःपुञ्जै-
र्दृक्सम्भूतैर्मृत्युर्नास्तीत्याख्याय त्वम् ॥ ४ ॥

"गता स्नेहसरिता यदि शार्षं सिकता तत्र सखे! मिलिता"

चन्द्रभानुः त्रिपाठी

(१)

नेता यत्र वञ्चयति जनतामहितं सततं कुरुते
मित्रं भवदपकुर्वेत्पृष्ठे मित्रे दयां न तनुते ।
परोपदेशे पाण्डित्यमनुसरणीया दुर्नीतिः
यदा प्रसीदति पशुता भविता मानवता तु ततश्चलिता ॥

(२)

रविकरनिकरप्रखरस्तापो यदा जडत्वं भजते
धारासारैः सिक्तः पवनो लताः कम्पयन् वहते ।
दीनविषादं धनिप्रसादं पश्यति यदा निशीथः
शिशिरे पतत्तुषारहता सा तदा नवा नलिनी मलिना ॥

(३)

आश्रितदीनप्राप्यं हृत्वा यत्र भवति भूस्वामी
धर्मं प्रथमं मोक्षं चरमं कथयत्यर्थी कामी ।
यत्र बली निष्करुणस्त्यागी विज्ञजनो वाचालः
तत्र नैव चेतनता देशेऽपि तु जडता-सत्ता फलिता ॥

(४)

राष्ट्रियभावो विकसति विलसति यत्र नवीनपदाली
दक्षस्त्यागी धीरो वीरः स्तुतो महाबलशाली ।
सुप्तं जनं नयन्ती बोधं सच्चिच्छिवस्वरूपा
हततेजस्कयुवाग्रे गीता सा पतिता कविता ललिता ॥

दाम्पत्यम्

धू. अर्कसोमयाजी

केयं मे गृहिणी या मां प्रतिबध्नाति संसृतौ ।
आविवाहं दिवारात्रं क्रान्त्वा मे मानसाम्बरम् ॥ १ ॥

नूनं तस्या ममापि स्यात् प्राक्तनं बन्धनं क्वचित् ।
नो चेदिदं कथंकारं भवेद्दाम्पत्यमावयोः ॥ २ ॥

गार्हपत्याय देवैस्सा मह्यं दत्ता भवेद्ध्रुवम् ।
यथा पाणिग्रहे मन्त्रं तादृगर्थं मयोदितम्[1] ॥ ३ ॥

अहं द्यौः पृथिवी सा वै मनोऽहं सा च वागिति[2] ।
श्रुतिर्जोघुष्यते, सत्यं, दाम्पत्यं तादृगेव हि ॥ ४ ॥

काष्ठं काष्ठं समेत्याथ व्यपेयातां नदीजले[3] ।
दम्पती तादृशौ स्यातामित्यहं नैव भावये ॥ ५ ॥

जन्म जन्मान्तरीणं यत् सरूपं कर्म तत्कृतम् ।
तद्बलेनैव तावद्य जायेते जम्पती भुवि ॥ ६ ॥

सुखदुःखे समे भुङ्क्तो गाढमन्योन्यसंश्रितौ ।
दम्पती किमिदं पूर्वजन्मकर्म विना भवेत् ॥ ७ ॥

आनन्दं सुवते जायापुत्रास्संसारवर्त्मनि ।
व्यतिषङ्गः किमाहोस्वित् निर्बीजस्स्यात् पुराभवे ॥ ८ ॥

---

१. भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ।
२. द्यौरहं पृथिवी त्वगँ् .... मनोहमस्मि वाक्त्वगँ् .... सा मामनुव्रता भव ।
३. रामायणात् १. १०५. २६. (मन्त्रप्रश्नः)

केन्द्रस्य परितो यद्वत् परिधिः परिधीयते ।
पत्नीमाश्रित्य पत्युश्च जीवितं परिधीयते ॥ ९ ॥

परस्परतपस्सम्पत्फलायितपरस्परौ[4] ।
प्राञ्चौ जायापती यद्वत् तथाऽन्यौ दम्पती भुवि ॥ १० ॥

अन्योन्यमनुबध्नीतो दम्पती नित्यजीविते ।
जोषमाणौ च कष्टानि जीवितं न जुगुप्सतः ॥ ११ ॥

अद्वैतमेव दाम्पत्यमर्धनारीश्वरायितम् ।
अहार्यो रस इत्याहुः वार्धके प्रेमसारभूः[5] ॥ १२ ॥

रुग्णां पत्नीं पतिर्दृष्ट्वा पत्नी रुग्णं पतिं तथा ।
कीदृशीं वेदनां यातो जानाते जम्पती स्वयम् ॥ १३ ॥

दाम्पत्यग्रन्थिरेषोऽसौ दुर्ज्ञेयस्तनुतेऽद्भुतम् ।
भगवानेव जानीते दधानस्सर्गनाशने ॥ १४ ॥

कल्पादेरा च कल्पान्तं कालगर्भे धरातले ।
कति वा लीयमानानि दाम्पत्यानि भवन्त्यहो ॥ १५ ॥

दाम्पत्याद्वैतनिष्ठं यद् दम्पत्योः प्रेम निर्मलम् ।
ब्रह्मानन्दस्य सब्रह्मचारीत्येव न बन्धकृत् ॥ १६ ॥

---

४. कुवलयानन्दात्

५. अद्वैतं सुखदुःखयोरनुगतं .... यस्मिन्नहार्यो रसः .... यत्र प्रेमसारे स्थितम् .... (उत्तररामचरितात्)

तादृशं प्रेम मन्येऽहं पवित्रं दिव्यमित्यपि ।
यथा रामस्य सीतायां तस्यास्तस्मिन् तथाविधम् ॥ १७ ॥

मूर्धानं पत्युरारोह प्रजया च विराड् भव[६] ।
श्रुतिरित्थं यदि ब्रूते अबला सा कथं भवेत् ॥ १८ ॥

विद्वांसमपि जानानं संसाराऽसारतां दृढम् ।
प्रवर्तयति संसारे बलाद्या साऽबला कथम् ॥ १९ ॥

शक्त्या युक्तश्शिवो यद्वत् प्रभवेदिति वर्णितम्[७] ।
गार्हपत्यं गृहिण्यैव शक्तं संसारजीविते ॥ २० ॥

गृहिणी धर्मपत्नीति जायेति श्रुतिषु स्तुताः ।
दारा धर्माय कल्पन्ते संसारस्सागरेत् कथम् ॥ २१ ॥

पशुपक्षिमनुष्याणां जीवितं जीविनामहो ।
दाम्पत्यग्रन्थिना क्लृप्तं विधातुर्माययाऽऽवृतम् ॥ २२ ॥

जीर्णारण्यं जगद् भाति पुंसश्शून्यस्य जायया ।
स्त्रियो वा पतिहीनायाः अहो संसारसारता ॥ २३ ॥

एकपत्नीव्रताः पुंसः यदि नार्यः पतिव्रताः ।
अहो कीदृग् भवेल्लोकः कलिरेव कृतायते ॥ २४ ॥

---

६. मूर्धानं पत्युरारोह प्रजया च विराड् भव । (मन्त्रप्रश्नः)
७. सौन्दर्यलहर्याः १.

मेघनवकम्

स्वयंप्रकाशशर्मा

आकृष्य चाकृष्य पयोधिसारं
यच्छन्ति लोकाय सदैव मेघाः ।
कार्यं क्वचित्त्याज्यमपीह लोके
श्रेयांसि पुष्णाति कृतं परार्थे ॥ १ ॥

ऊर्ध्वं यियासोर्नभसा जनस्य
सोपानरूपेण पुरःस्थितास्ते ।
द्यावापृथिव्योः स्थगयन्ति भेदं
कृतोपकारा इव वारिवाहाः ॥ २ ॥

चन्द्रार्कबिम्बे सुतरां विलुप्ते
नक्तंदिवा चापि न भाति किञ्चित् ।
दिशो विनष्टा विदिशोऽपि लुप्ताः
लिप्तं तमोभिर्वियदन्तरालम् ॥ ३ ॥

धाराशरैश्चोपलवर्षणैश्च
निघ्नन् स मेघश्चपलाकृपाणः ।
कादम्बिनीं द्रागभियोज्य सेनां
प्रयाति गर्जन् विजयाय जिष्णुः ॥ ४ ॥

अजस्रधाराभिरनन्तराभि-
रम्भोमयं विश्वमकारि मेघैः ।
मध्येसमुद्रं धरणी विलीना
कल्पान्तदृश्यं भुवि संप्रवृत्तम् ॥ ५ ॥

लुप्तार्कदीपा विनिवृत्तकार्या
नीलाम्बुदं कम्बलकं वसाना ।
शीताद्विभीता चतुरोऽपि मासान्
सुखेन शेते रमणीमणिर्द्यौः ॥ ६ ॥

क्वचिन्नतोऽपि क्वचिदुन्नतश्च
क्षीणः कुतश्चित्पुनरेव पुष्टः ।
दृष्टान्तरालोऽपि मनोरमोऽसौ
रसं स्रवन् भाति पयोधराद्रिः ॥ ७ ॥

विलोक्य मेघं कमनीयकान्तं
विद्युत्कलत्राद्रहितं रुचा द्यौः ।
इन्द्रायुधाभ्यां रमणीयदोर्भ्यां
रागात्समालिङ्गितुमिच्छतीव ॥ ८ ॥

प्रक्षीणवीर्यः श्रितवातदेहः
लोकान् प्रपश्यंश्चपलेक्षणैः सः ।
श्वेताभ्रकेशोऽपि रसानुरागी
प्रयाति धाराधरवृद्ध एषः ॥ ९ ॥

अहोरात्रम्

राधावल्लभः त्रिपाठी

अहश्च रात्रिश्च हि रागनिर्भरौ
सुसान्ध्यकाले भृशमार्त्तचेतसौ ।
समागतौ चाथ परस्परं क्षणाल्
लिलिङ्गतुर्हर्षपरीतमानसौ ॥ १ ॥

निबद्धनिःश्वासविकम्पिताधरौ
परस्परं वेष्टितदेहधारिणौ ।
सुसंस्थितौ मूर्तियुगं यथा हि ता-
वविन्दतां कालगतिं न शाश्वतीम् ॥ २ ॥

विहाय रात्रिं स जगाम सत्वरं
दिनस्ततो व्याकुलमानसा भृशम ।
रुरोद विम्ना कुररीव साऽऽकुलं
विहङ्गमानां विरुतैर्वियोगिनी ॥ ३ ॥

क्रमेण सा गर्भभरालसा पुन-
र्यथाकथञ्चिद् विनिगूह्य वेदनाम् ।
विगर्हयन्ती प्रियधर्महीनतां
क्षणाय सुप्तेव बभूव मानिनी ॥ ४ ॥

ततोऽनुभूय प्रसवस्य वेदनां
चिरं प्रभाते करुणं लपन्त्यहो ।
प्रजागरक्लेशविशेषविक्लवा
सुतं प्रसूता भुवनैकलोचनम् ॥ ५ ॥

ज्योत्स्नामय्यां रजन्याम्

श्रीदुर्गादास गोस्वामी

सह्यो विनिद्रोऽभवमेकदाहं
स्तब्धेऽर्धरात्रे मम नेत्रयुग्मे ।
आसीत् तदानीमपि गाढसुप्ते-
रावेशलेशः शिथिलं विलग्नः ॥ १ ॥

आस्तीर्य शुभ्रं वसनाञ्चलं स्वं
निशीथिनी भूमितले शयाना ।
ज्योत्स्नाद्रवस्नापितमूर्तिरासीत्
सम्मोहिनी स्वप्नभरे निमग्ना ॥ २ ॥

शीतस्य लेशः पवने द्वितीय-
यामस्य शेषः क्वचिदप्यदूरे ।
गायंस्तदासीत् करुणैकतान-
स्वरेण कश्चिद् विरही विहङ्गः ॥ ३ ॥

कथं न जानेऽश्रुझरो ममाक्ष्णो-
रायादकस्मात्तु विना निमित्तम् ।
वक्षः सशल्यं हृदयं व्यथार्तं
प्राणास्तथासन्नतिविह्वला मे ॥ ४ ॥

अहारयं शैशववैभवान् मे
यान् हेलयाहं हृदये गभीरे ।
स्मृतेस्तु तेषां करुणाऽस्फुटाभा
माया ह्यकालेऽद्य समद्युदेति ॥ ५ ॥

अतन्द्रचन्द्रोज्ज्वलचन्द्रिकाभिः
स्वगार्तशोकेन च दूरसंस्थात् ।
दिक्प्रान्तराद् वायुरयादपेता
सा मे प्रविद्धा हृदि गीतिकेव ॥ ६ ॥

धूपोऽभवद् दग्ध इवास्य गन्धी
हृन्मन्दिरं व्याप्य तु शिष्यते सः ।
कस्मिन्नतीतेऽवसितं हि नृत्यं
तन्नूपुरं तु ध्वनतीव तूष्णीम् ॥ ७ ॥

बाल्ये ममास्पष्टतरे कदाचि-
दपूर्वसौन्दर्यरसप्रमत्ता ।
आयान्निशेदृग् भुवि काप्यहो मे
तन्म्लानरेखाद्य मनस्युदेति ॥ ८ ॥

आसीददूरे तरलैः प्रवातैः
सशब्दमान्दोलितवेणुवीथिः ।
जनं स्थलं शून्यमिहोच्छलाभि-
र्ज्योत्स्नाभिराप्लावितमेवमासीत् ॥ ९ ॥

रोमाञ्चिताया धरणेर्निशाया
मायाजुषो व्याप्य सुदीर्घयामान् ।
कश्चिद् विहङ्गोऽविरतं प्रकूज-
न्नासीत् क्वचिद् व्याकुल ईदृगेव ॥ १० ॥

कथं न जानेऽद्य यथा तथैव
दिनेऽपि तस्मिन् खलु तच्छिशोर्हृत् ।
क्षणे क्षणे स्पन्दितमीदृगासी-
दगोचरावेगभरात् प्रकामम् ॥ ११ ॥

श्रेष्ठे क्षणेऽस्मिन् हृदि विह्वले मे
प्रोद्बोधयत्यद्य निशास्मृतिः सा ।
उन्मादनां बाल्यकुहेलिकां ता-
मुत्सार्य कालान्तरगां च बाधाम् ॥ १२ ॥

"हाली"*

प्रभाचार्यः

हाली विलासगमना कमनीयशोभा
शुभ्राभ्रधौतपरिधानविशेषरम्या ।
संभाषणेषु चतुरा मधुराढ्यभावा
प्रायः स्मृतौ स्फुरति मे स्फुरदङ्गयष्टिः ॥ १ ॥

प्रौढापि सा वयसि दृश्यत एव कन्या
शोभां तनोति नवकोमलपद्मिनीव ।
तस्या मुखं विशति मे विवशेव वीक्षा
पुष्पाश्रया हि मधुलोलुपभृङ्गपङ्क्तिः ॥ २ ॥

तस्याः प्रभासुनिशिते नयने नितान्तं
दक्षे दृढस्य हृदयस्य विदारणेऽपि ।
भद्रं हि ते तु बहुशः पठने नियुक्ते
मत्तुल्यदीनहृदयाः कुशला हि सर्वे ॥ ३ ॥

किं श्रद्धया पठति सा पठनावगाहा
कस्मिन्नसज्जगति सा चरति प्रहृष्टा ।
जानाति साररहितं जगदित्यरम्यं
रम्यं हि तद्बहुविधैः कविना प्रणीतम् ॥ ४ ॥

इच्छामि वीक्षितुमहं कुपिताननाब्जं
तस्याः कदापि यदहो नितरां मनोज्ञम् ।
उत्तेजितं किमपि किंचिदवाप्तरागं
सायंतनारुणरुचीव पयोदखण्डम् ॥ ५ ॥

---

* तन्नाम्नी काचित् ।

विचित्रानुभूतिः

प्रभाचार्याः

एकान्तनिर्जनवने सरितस्तटे वा
स्वैरं यदा परिचरामि विविक्तचित्तः ।
प्रायस्तदा भवति मे हृदये प्रशान्तेऽ-
प्यव्यक्तभावभरिता मधुरानुभूतिः ॥ १ ॥

का सा किमात्मनि कियन्मथनं तनोति
श्रान्ते विषादरहिते मयि निःस्पृहेऽपि ।
शक्नोमि न प्रथयितुं तदवश्यभावं
नूनं परार्थनिहितप्रतिभेव बुद्धिः ॥ २ ॥

पश्यन् कदापि परितो मधुराणि दृश्या-
न्यात्मानमन्यतनुभागिव विस्मरामि ।
अव्यक्तभावकलितं भवतीव चेतो
व्यक्तस्त्वहेतुकसुखानुभवः शरीरे ॥ ३ ॥

बाष्पोदयेन च कदापि दृशो निरोधः
आलिङ्गितुं सकलसृष्टिमभीप्सित च ।
भ्रान्तिश्च कोऽपि मृदुभिः स्वयमङ्गुलीभिः
हेलाविधेन हृदयं स्पृशतीव गुप्तम् ॥ ४ ॥

दृष्टं जगद्विमलदिव्यमनोहरायां
कान्तौ निमज्जितमिव प्रतिपन्नतेजः ।
नाहं क्षमोऽस्मि विशदीकरणाय तस्य
निर्दुष्टहर्षविभवस्य मनोभवस्य ॥ ५ ॥

विश्वं प्रसन्नमिव मे स्मयमानभावं
हृष्टाः खगाश्च विरुतैरिव मां ह्वयन्ते ।
नूनं प्लवे निरवधौ सुखनीरराशौ
हीनव्ययः परिहृतात्मभवप्रयासः ॥ ६ ॥

आनन्दतुन्दिलमनाः विगतश्रमोऽपि
चित्रं विषण्ण इव वेद्मि मनोऽन्तराले ।
पर्युत्सुकोऽस्मि मथितं व्यतिरिक्तरीत्या
हर्षव्यथार्तमिव मे मन एककाले ॥ ७ ॥

क्लेशः सुवेद्यमहिमा मनसस्तनोर्वा
यः प्राप्यते कतिपयैर्घटितैर्दुरन्तैः ।
क्लेशस्त्वहेतुकभवो हृदयान्तराले
संप्राप्तहर्षविभवे महनीयभावः ॥ ८ ॥

मन्ये महानिति मम क्षुभितात्मभावः
येनैव वेद्मि परमं जगतो रहस्यम् ।
औत्सुक्यमात्मजनितं प्रकृतेः पुरस्तात्
व्यक्तीकरोति निखिलान्तरितैक्यभावम् ॥ ९ ॥

उत्कण्ठया बहिरुपस्थितरम्यसृष्टेः
व्यक्तीकृतान् बहुविधान् परमात्मभूतान् ।
भावानुपात्तमभियाति ममात्मतेजः
तद्यत्नजातमधुरानुभवा व्यथेयम् ॥ १० ॥

"प्रतिसंदेशः"*

म. ना. जोशी

यक्षस्यैषा परमदयिता सालकायां वसन्ती
नीत्वा भर्तुर्विरहसमयं दुस्सहं कल्पदीर्घम् ।
क्षिप्त्वा वीणामुरसि मनसा वल्लभं संस्मरन्ती
यावच्छेते धरणिशयने तावदायात् स मेघः ॥ १ ॥

दृष्ट्वैनां स क्षणमुपगतः संशयं किं नु सैषा
स्मारं स्मारं तदुदितगुणान् तैर्विनिश्चित्य तां च ।
विद्युद्दृष्टिं सदनमभितः पातयन् मोघयन्नः
मेघोऽगर्जत् तदनु तरसा सा प्रबुद्धाऽतिभीत्या ॥ २ ॥

बुद्ध्वा वक्त्रं सपदि पिदधे पाणिपद्मेन तन्वी
दूतोऽवोचन्निजपरिचयं यक्षसन्देशयुक्तम् ।
मेघालोकः सुखिनमपि यत् खेदयेदित्यसिद्धं
मेघे तिष्ठत्यपि बहुमुदं सा तदा प्राप यस्मात् ॥ ३ ॥

तेजःशेषं मुखमतिशुचा केशजालं विकीर्णं
क्षीणां दीनां तनुतनुमतीं विप्रयोगात् सुदीर्घात् ।
दर्शं दर्शं बहुमपि तथा गेहभागं विशोभं
वृष्टिव्याजात् सुहृदपि जवात् दूतमेघो रुरोद ॥ ४ ॥

श्रुत्वा वार्तां प्रियविषयिणीमात्मजीवातुभूतां
वक्तुं यत्नं कलितवचसा कुर्वती यक्षभार्या ।
हर्षोद्रेकान् न खलु गदितुं किञ्चिदप्याशु शक्ता
श्रुत्वा सत्यो दयितकुशलं हर्षमूका भवन्ति ॥ ५ ॥

कृत्वा बाष्पैः स्रजमुरसि सा मौक्तिकीं सम्बभाषे
"क्षिप्ताः कष्टाद्युगवदमितास्ते मयाष्टौ च मासाः ।
शिष्टे कालेऽप्यनतिबहले सोऽपि भूयान् विलम्बः
प्राणिम्येषा प्रकृतिकृपणा केवलं तत्कृतेऽहम्" ॥ ६ ॥

इत्यापृच्छ्य प्रियजनहितं दूतवर्यं पयोदं
नानारूपैः प्रणयमधुरैः नन्दयन्ती वचोभिः ।
तस्यैवान्यं किल जलधरं भ्रातरं प्राथ्यं कालात्
साकं तेन प्रतिवचनमुत्स्रष्टुमैहिष्ट बाला ॥ ७ ॥

"शापस्यान्ते यदपि कुरुषे पक्ष्ममेयं विलम्बं
छेत्स्याम्येव स्वयमहमहो मामकप्राणतन्तून् ।
प्रायो जीवाम्युत दयित भोः प्राप्तकालेऽप्युपेयाः"
को वालम्बो दयितहृदयादन्य एवाङ्गनानाम् ॥ ८ ॥

लूता

डा० भास्कराचार्यः त्रिपाठी

लूते तव महिमासौ महीतले ब्रह्मणस्तुल्यः ।
निरुपादानवितानं तनुषे यत्तोयतन्तुराशीनाम् ॥ १ ॥

त्वं चिन्तासन्तानं मानवमस्तिष्कसच्छाया ।
पाताले तव मूलं विस्तारो भानुदीधितिव्यापी ॥ २ ॥

पुंसः तर्कवितर्काः चेतसि धूमायिता नित्यम् ।
तव खलु रुचिरावेगः पुरतो जगतः प्रतानमाप्नोति ॥ ३ ॥

विश्वामित्रतपस्ये त्वं ननु जन्मान्तरेऽप्याऴि ।
रचयसि भुवनव्यूहं, स्वाप्निकसूत्रैः बिहायसं व्याप्य ॥ ४ ॥

परमाणूनां जाऴं दूरमराऴं समाकिरसि ।
कीटकरम्बकबधिके, नन्वधिकं ते प्रशस्तविज्ञानम् ॥ ५ ॥

रश्म्यनुसारी जीवः तावत्तूर्णं न निर्गच्छेत् ।
यद्वत् सूत्रसरण्या कीटासृक्पायिनी पलायेथाः ॥ ६ ॥

अयि लूते कृमिभूते, प्रभूतशोधस्त्वया विहितः ।
किन्तु पराभूते हा, संसृतिपदवी दवीयसी जाता ॥ ७ ॥

चाटूक्तयः

वट्टिपाल्लि मल्लिनाथशर्मा

*

विषस्य नवनीतस्य भक्षणेन वृषाकपी ।
स्वाभेदं प्रकटीकर्तुं समभूतां सितासितौ ॥

*

विधिसारथिना नीतो जीवो देहरथे स्थितः ।
आशातरङ्गिणीतीरविहारेणैव तुष्यति ॥

*

अज्ञानपूर्णवर्णापि[1] मषी सुकविलेखनात् ।
सुवर्णतामनुप्राप्य ज्ञानमेव ददाति हि ॥

*

ऋणाधिक्यं सुताधिक्यं दारिद्र्यं दैन्यलाघवे ।
स्वल्पसन्तोषिता नित्यमुपाध्यायस्य लक्षणम् ॥

*

बलवान् धनवानेव धनेशनिधनेशयोः ।
निधनेशो हि हन्त्यन्ते धनेशो नित्यमामृति ॥

*

निद्रैवातिप्रिया नृणां या प्रियामतिरिच्यते ।
समये तामपि त्यक्त्वा रमते निद्रया हि सः ॥

*

---

१. अज्ञानं तमः, तत्पूर्णवर्णा कृष्णवर्णा ।

अहो प्रमादः !

श. श्रीनिवासशर्मा

कियद्रम्यं मद्रपुरस्य समुद्रतीरम्! विद्युद्दीपप्रकाशेन भास्वरं, विस्तीर्णं सिकतिलं च तत् स्थलं प्रदोषचन्द्रिका भृशं क्षीरे निमज्जयति। मारुतः शीतावहः सुखं परितस्समुपविष्टान्सेवते। मध्याह्नकठोरतापेन परिदूनाः कति नागरजनास्सायं सपरिवाराः बाष्पयानानि पङ्क्तिशः पर्यन्तस्थाप्यात्मनः शान्तिं सुखं चाभिलषन्तः उपासते क्षीरधवलं सिकतिलमेतत्समुद्रतीरम्। समग्रेऽपि भारते इदमेव समुद्रतीरमेतावत्प्रसिद्धं यद्विदेशीया अपि विस्मयचमत्कृता भवन्ति।

सिद्धार्थस्यापि तदानीं तदेव समुद्रतीरमाश्रयोऽभवत्। तस्य मनसि तादृशश्चिन्ताभरः उत्सादश्चासीत्, यः अतिमात्रमात्ममनोविनोदनमभिलषति स्म। अधिविद्यगोष्ठ्यां प्रसिद्धः स्वयं सम्पन्नश्चासीत्सिद्धार्थः। शिक्षाविभागे सहायकः पाठशालापर्यवेक्षकः आसीत्सः। मनोज्ञं तस्य जीवितम्। तेन विरुदप्राप्त्यनन्तरमेवोद्योगो लब्धः। वेतनं च पुष्कलमासीत्। स्वसमानवयस्का-स्तस्य नैतावता प्रयत्नाप्युद्योगं अलभन्त। 'सर्वेऽपि मम वचनं मानयन्ति; किङ्कराश्च वशानुगाः' इति सिद्धार्थस्य चित्तसमुन्नतिर्महती आसीत्। तस्मिन्दिने तादृशः सन्निवेशः कश्चन भवितेति न स्वप्नेऽप्यचिन्तयत्। 'कस्याग्रे रुद्यताम्? । कस्याग्रे प्रलप्य चित्तक्षोभः प्रमार्ज्यताम्?'। सः इदानीमेव प्रतिनिवृत्तः कार्यालयात्। अष्टमघण्टा ताडिता राजकीयकला-शालाघटिकायाम्। केचन प्रतिनिवृत्ताः नागरजना गृहान्प्रति। निभृत-प्रायात्तस्मात्समुद्रतीरात् नातिदूरे समदृश्यत सिद्धार्थस्य कार्यालयद्वारम्। पिहितमणिकवाटं, प्रज्वलितान्तःप्रदीपं च तत्प्रसुप्तशुकं पञ्जरमिवासीत्। सर्वदापि गौरवास्पदं तस्य दर्शनमद्य दुस्सहमिवाभवत्। उच्चावचतरङ्गतु-मुलोद्घोषेण माणवका इव परिहासाट्टहासमिवासृजत् समुद्रः सिद्धार्थं

प्रति । 'अहो प्रमादः'—सिद्धार्थस्य मुखात् निस्ससार इमान्यक्षराणि । ईदृशः सन्दर्भः कथं सञ्जातस्तस्य?

'पाठशालापर्यवेक्षकस्सिद्धार्थः'—इति नामश्रवणेनैव काचन भीतिः पाठशालाध्यापकानाम् । साधवो माणवकाश्च चकिताः । कक्ष्यां कक्ष्यां प्रविशन्नेव 'इदमेवं कृतं वा? .... इदमेवं कर्तव्यम् .... अध्यापनं न समीचीनम् .... धृष्टा माणवकाः .... इति दूषणाध्यायमारभमाणः पाठस्य, प्रश्नस्य, प्रतिवचनस्य च सम्बन्धमनवेक्ष्यैव प्रश्नानुच्चावचानकरोत् । सम्बन्धे असम्बन्धं, असम्बन्धे सम्बन्धं वा परिकल्प्य तस्य प्रश्नधोरणी सर्वान्भीषयति स्म । सर्वासु पाठशालासु एकप्रकारमेव गणिते, भौतिके, अथवा भाषासाहित्ये प्रश्नमपृच्छत् । माणवकाः उत्तरदानेऽसमर्थाः विभीषिकया इतस्ततो दृष्टिं प्रसारयन्तः अध्यापकस्य मुखमेवान्ततः अपश्यन् । अध्यापकोऽपि न किमपि वक्तुं शशाक । अस्मिन्नेव सन्दर्भे महान्सन्तोषस्सिद्धार्थस्य । पर्यवेक्षणगौरवं प्रकटयितुं एतादृश एव सन्दर्भः प्रतीक्षितस्तेन । अध्यापका अपि 'नैवं प्रश्नः कर्तव्यः' इति वा प्रश्नस्य समीचीनः पन्था एवम्' इति वा वक्तुं नेशते स्म । पर्यवेक्षकस्याधिकारिणः अग्रे तथा धीरं वक्तुं कस्य वा भवति मनः? ।

एवं बहवः पर्यवेक्षणदिवसा अतीताः । 'अस्माभिर्जितम् । मम खलु पर्यवेक्षणेन भीतभीता वराका माणवका अध्यापकाश्च कानि कानि न कुर्वन्ति । धन्या ममोद्योगधोरणी'—इति मन्वानः महतीं चित्तसमुन्नतिं बभार । अन्ततस्तदेव अप्रतीक्षितं दिनं पर्यायतः प्राप्तम् ।

तस्मिन्दिने यथापूर्वं आत्मनो महत् उद्योगगौरवं मनस्यावर्तयन् कक्ष्यां प्रविशन्नेव गणिते प्रश्नमेवं चकार—'यूयं गणिते अधीतिनः खलु । सम्यग्विचार्य वदत मम प्रश्नस्योत्तरम् । शृणुतेदानीम्—'मद्रपुर्याः प्रस्थितं

धूमशकटं तिन्त्रिणीवनपर्यन्तं प्रहरे चत्वारिंशत्क्रोशवेगेन धावति; ततः परं पञ्चाशत्क्रोशवेगेन विल्लुपुरं यावद्धावति; एवं तर्हि मम वयसः प्रमाणं किम्? अयं प्रश्नः । समर्थाः खलु यूयं माणवकाः । वदत....त्वम्.... त्वम्....' इति क्रमशः सर्वान्संमुखीचकार । जहास च स्वस्य कृत्रिमप्रश्न-वैदग्ध्यमनुचिन्त्य । कक्ष्यायां न कोऽप्युदतिष्ठत्प्रतिवचनं दातुम् । 'अद्यापि जितमस्माभिः—' इति सिद्धार्थः सोत्प्रासमध्यापकमीक्षते स्म । अत्रान्तरे समर्थो दुष्टवटुकः कश्चन उदतिष्ठत् । 'अरे! त्वमेकोऽवशिष्टः । वद प्रश्नस्योत्तरम्'—इत्यपृच्छत्सिद्धार्थः ।

माणवकः—'आर्य! अहमस्य प्रश्नस्योत्तरं वदामि' ।

पर्यवेक्षकः—'बाढम्; वद' ।

माणवकः—'मद्रपुर्याः प्रस्थितं धूमशकटं तिन्त्रिणीवनपर्यन्तं प्रहरे चत्वा-रिंशत्क्रोशवेगेन धावति; ततो विल्लुपुरं यावत्पञ्चाशत्क्रोशवेगेन । तर्हि पर्यवेक्षकस्य वयसः प्रमाणं किम् इति किल प्रश्नः?'

पर्यवेक्षकः—'प्रश्नस्तावदेवम् । उत्तरं किल वक्तव्यम्; उच्यताम्' ।

माणवकः—भवतो वयसः प्रमाणमष्टाचत्वारिंशद्वर्षाणि ।

पर्यवेक्षकः—'अष्टाचत्वारिंशदिति सत्यमेव मम वयसः प्रमाणम्; अथापि एतावता न कोऽपि धीरमवदत्, कथमयं वदति'—इत्येकतो विस्मया-विष्टः, इतरतश्च कथं मम असम्बद्धगणितप्रश्नः सत्यापितोऽनेन । कदाचिद्धूमशकटवेगस्य, मम वयसश्च सम्बन्धो भवेत्? इति अपूर्वशङ्का-ग्रस्तश्चासीत् । कथंचित् मन उपसान्त्वयन् 'भवतु; कथं त्वया ज्ञातम्, सत्यापय सम्बन्धज्ञापनेन'—इति सोल्लासं माणवकमपृच्छत् ।

माणवकः—'आर्य! भवतो वयसः प्रमाणमष्टाचत्वारिंशद्वर्षाणि इति ममोत्तरम् अपि समीचीनम्?'

पर्यवेक्षकः—‘समीचीनम् । ननूक्तं सत्यापयेति’ ।

माणवकः—‘आर्यवर! एवम् । मम खलु प्रातिवेशिकः अर्धोन्मत्तः चतुर्विंशतिवयस्कः प्रतिवसति’ ।

पर्यवेक्षकः—‘भवतु किं तावता?’

माणवकः—‘अर्धोन्मत्तः चतुर्विंशतिवयस्कः, चतुर्विंशतिवयस्कः अर्धोन्मत्तः । एवं परिगणने भवान्............ ।

पर्यवेक्षकः—‘अहो । कथमनेनाधिक्षिप्तोऽस्मि । चतुर्विंशतिवयस्कस्य अर्धोन्मत्तत्वे अष्टाचत्वारिंशद्वयस्कस्य पूर्णोन्मत्तता खलु फलति! अहो धाष्ट्र्यं दुष्टवटुकस्य! इति इदंप्रथमतयोपनतेनानेन मुखभङ्गेन विमना अभवत्पर्यवेक्षकः ।

माणवकानां हासोल्लासः प्रच्छन्नश्च प्रकाशश्चासीत् ।

‘अहो प्रमादः’ इति कक्ष्याध्यापकः उपांशु वदन् माणवकान्पर्यवेक्षकं च सोत्कम्पं क्रमेणावलोकयति स्म ॥

"हा हन्त हन्त विधिना परिवञ्चितोऽस्मि"

डा. जि. रामा

आसीत् कश्चन लम्बबुद्धिर्नाम छात्रः कस्याञ्चिल्लब्धप्रतिष्ठायां कलाशालायाम् । सा कलाशाला विश्वविख्याते विश्वविद्यालये आसीत् ।

तस्यां कलाशालायां बहवोऽध्यापकाः प्राध्यापकाश्चासन् येषामन्यतमस्य सकाशे लम्बबुद्धिरध्ययनं व्यधत्त । तस्योपस्थितिसंख्या[१] कलाशालाप्रचलनदिवससंख्यायाम्[२] अर्धार्धमपि नोपालभ्यत । यदि वत्सरान्ते वारं वारमपि गणना क्रियेत बाहुल्येन तस्यानुपस्थितिः कक्ष्यायां निर्धारितप्राय एवाभवत् । स पाठानुपेक्ष्य कलाशालोपस्थितिमुत्सृज्य ग्रामान्तरगमनं चलचित्रशालाटनं किमपि किमपि कार्यान्तरं करोति स्म । अत्यल्पदिवसेष्वुपस्थितेन तेन धूर्तलक्षणलक्षितमतिविनयं अतिसम्मानं च गुरूणां प्रकटीक्रियते स्म । पाठनकाले किमप्यालोचयतः तस्यावगतविषयस्येव शिरःकम्पनम्, अवहितचेतस इव निश्चलत्वं, अवबुद्धरसस्येव अतिहासादिकं च स्वाभाविका अदृश्यन्त । परन्तु गुरुभिः कस्मिन्नप्यध्यापितविषयेऽपि पृष्टे सः खसूचिमुद्रामवालम्बत । गुरूणां नानाविधमिष्टान्नपदार्थोपहरणैः सन्तोषकर्मणि परं सावधानचिन्तः वर्तते स्म । गुरुरपि निरन्तरोत्पाद्यमानाऽऽहारसमस्यादिके कष्टे काले प्रियतमेन लम्बबुद्धिना यत्किमपि नम्रधिया अदीयत तस्य कथमपि स्वीकारविमुखो नाभवत् ।

एकस्मिन् दिने गुरुः सञ्जातकरुणः शिष्यसेवावर्जितचित्तः सन् लम्बबुद्धये सुलभमनायासेन परीक्षोत्तरसिद्धिकर्मणि दास्यमानानि पञ्चसंख्याकानि प्रश्नोत्तराणि अमोघमन्त्राणीव रहस्युपदिदेश । शिष्योऽपि कृतकृत्यमात्मानं मन्यमानः सिद्धमन्त्र इव गुरवे विविधान् प्रणामान् समर्प्य सन्तुष्टचेतास्समभूत् ।

---

१. attendence.

२. number of working days.

परीक्षादिवसा व्याघ्रा इव समागच्छन् । स्वकीयं प्रयत्नं सफलं मन्यमानोऽयं लम्बबुद्धिः गुरूपदिष्टप्रश्नोत्तराणां परिरटनपरिपाट्यां पुष्कलं परिश्रान्तोऽपि विफलप्रयत्न एव समभूत् । तेन गुरुप्रकाशितप्रश्नोत्तराणां कण्ठस्थीकरणे बहवः प्रकाराः अवलम्बिताः । निद्राव्यसनस्य तस्य रात्रौ जागरणं ब्रह्मप्रयत्न इवाभवत् । क्षपायां निद्राक्षयार्थं चायादिकमपीपिबत् । चूडायां निद्राबलेन कम्पनशीलं शिरः स्थिरीकर्तुं दृढं पाशं बद्ध्वा प्रायतत । परन्तु यथा स्वगुरुः मिष्टान्नादिकं न जहाति स्म तथापि निद्रा लम्बबुद्धिं न त्यजति स्म । यथाकथंचित् जागरणं कृत्वा पञ्चदशदिनानि यावत् तेन भगीरथप्रयत्नः कृतः । हन्त! दैवप्रातिकूल्येन सर्वेऽपि प्रयत्ना निष्फलाः सञ्जाताः ।

ततः स लम्बबुद्धिः भगवन्तं नारायणं सेवितुमारेभे । नगरस्थितं देवालयं प्रतिदिनं द्वित्रिवारमसेवत । मन्दिरात् पुरतः स्थित्वा नारायणं प्रत्याक्रोशति स्म । 'त्वमेव माता च पिता त्वमेवे'त्यादि नानाप्रकारान् प्रार्थनाश्लोकान् पुस्तकं दृष्ट्वा उच्चैःस्वरेणागायत । विश्वस्मिन् विद्यमाना विविधा देवताः, लम्बबुद्धेः स्मृतिपथमागच्छन्ति स्म, विशिष्य विनायकः । आराधनकर्मणि न कोऽपि देवः परित्यक्तः । किन्तु परं सर्वं विपरीतं सञ्जातम् । परीक्षाकालः शीघ्रतमं समीपमुपागात् । सर्वमेतत् लम्बबुद्धिं संकटग्रस्तमकरोत् । श्रद्धां पुरुषप्रयत्नमन्तरा च न किमपि साधयितुं यः कोऽपि पुरुषः शक्नोतीति लम्बबुद्धिना न ज्ञातम् । यद्यज्ञास्यत् कथेयम् एतावत्पर्यन्तं नागमिष्यत् ।

लम्बबुद्धिः कस्मिंश्चिदपि प्रदेशे निभृतं स्थित्वा गुरूपदिष्टानां प्रश्नोत्तराणां केनापि प्रकारेण परीक्षासमाधानपत्रे लेखनोपायं चिन्तितुमारेभे । एवं चिन्तने परीक्षायाः एकमेव दिनमवाशिष्यत । परीक्षायाः पूर्वतने दिवसे तस्य स्थितिर्वर्णनातीता सञ्जाता । कातरेणातुरतया च किमपि कर्तुं तस्य शक्तिर्नावाशिष्यत । तस्मिन् समये तस्य मनसि तडिदिव काचन युक्तिः

प्रादुर्बभूव । सा युक्तिः विस्मृतदिक्कस्य दूरतरोपस्थापितप्रकाशपुञ्ज इवासीत् । तेन निश्चितं यत् सिद्धहस्तानां प्रश्नोत्तराणां प्रतिलिपिः परीक्षाभवने नेया इति । तस्या प्रतिलिप्यनन्तरं परीक्षासमाधानपत्रे उद्धरणीयेति च ।

एवं निश्चितेऽपि तस्य परीक्षाशालायां भविष्यन्तो निरीक्षकसञ्चालकादयः विधिनिषेधादयश्च तस्मै भयमुपजनयन्ति स्म ।

निश्चयानुसारेण लम्बबुद्धिः प्रतिलिपिं शरीरपरिधानैकदेशे सुगुप्तं सुनिपुणं निक्षिप्य परीक्षाभवनं ययौ । तस्य मनः धुघधुघायमानमेवासीत् । तत्र परीक्षाभवने तानेव स्वगुरून् परीक्षासञ्चालनकार्ये निरीक्षणकार्ये च विराजमानान् विलोक्य स्वात्मनि कमपि मोदातिरेकमाप । एवं विचिन्तयति तस्मिन् लम्बबुद्धौ परीक्षाप्रारम्भद्योतकः घण्टानाद उद्भूत् । अयं च सुसावधानः स्वाभीष्टवेलां प्रतिपालयन् समतिष्ठत् । उत्तरक्षण एव तेभ्य-स्तेभ्यच्छात्रेभ्यः सञ्चालकाः उत्तरलेखनार्थं पत्राणि प्रश्नपत्राणि च समददुः ।

दृष्टे स्वकीये प्रश्नपत्रे लम्बबुद्धिनाऽवगतं यत् प्रतिलिपिगतानि प्रश्नानि तान्येवेति । तस्मात् तेषां समाधानं लिलिखिषुः सः विघ्नराजं विशेषफल-प्राप्तये नमस्कृत्य प्रकृतं कार्यमुपक्रान्तवान् । अर्धघण्टासमयो व्यतीतः । तेन स्वानीतेषु पञ्चसु प्रश्नोत्तरेषु एकस्योत्तरं सम्यगवतारितम् ।

एतस्मिन्नन्तरे कुलसचिवप्रेषितो विशिष्टनिरीक्षणकर्मणि नियुक्तश्च कश्चन पुरुषः तद्भवनं समागच्छत् । स लेखनकर्मणि संलग्नांस्तांस्तान् छात्रान् निरीक्षमाणो लम्बबुद्धेः पार्श्वमपि समागतवान् । आगतेन तेन निःशङ्कं निर्भीकं निःशब्दं च प्रतिलिपिकर्मणि लग्नो लम्बबुद्धिरैक्षि ।

तेनैवं पृष्टो लम्बबुद्धिः "किं त्वया निक्षिप्तं परीक्षासमाधानपत्राभ्यन्तरे" इति । श्रुत्वा च तद्वचनं लम्बबुद्धिर्मौनमास्थत् । दिदृक्षुणा सञ्चालकेन पत्रमुत्थापितम् । अत्रान्तरेऽन्ये सञ्चालकाः समागताः । तैः सर्वैः उत्तरण-पत्राभ्यन्तरे प्रश्नोत्तरप्रतिलिपिरदृश्यत । आश्चर्यमिदमेवासीत् यत् परीक्षा-प्रश्नपत्रस्थप्रश्नानामेव प्रतिलिपौ समाधानान्यासन ।

सञ्चालको लम्बबुद्धिं पप्रच्छ—"किमिदं निषिद्धं कर्म? किमिदं चानाचरणीयं कार्यम्" इति । एतच्छ्रुत्वा स कातर्येण कम्पमानः उद्गतस्वेदजालैरार्द्रीकृतवस्त्र आस्त । अत्रान्तरे प्रधानसञ्चालको लम्बबुद्धेर्गुरुः तत्रोपस्थितवान् । गुरुमवलोक्य लम्बबुद्धिना ऊचे । "गुरो! तेषु पत्रेषु नैकं प्रतिलिपिपत्रम्, अपि त्वन्यान्यपि पञ्चषाणि पत्राणि विद्यन्त" इति । तच्छ्रुत्वा गुरुः लम्बबुद्धिं स्वशिष्यं मन्दं यथा स्यात्तथा निनिन्द-"किमर्थं बहिः प्रकटीकरोषि" इति । ततः स शिष्यः सविनयं यथातथाऽवोचत् "गुरो! यत् किञ्चित् सञ्जातं तत्सञ्जातप्रायमेव । किमीषदवशिष्टस्य गोपनेन" इति ।

ततः सद्य एव स छात्रः बहिर्निष्कासितः । स व्याकुलमना भूत्वा भवनाद्बहिरागत्यैवं विललाप । "हा हन्त हन्त विधिना परिवञ्चितोऽस्मि" इति ।

शूर्पणखाभिसारम् (गीतिनाट्यम्)

डा० वीरेन्द्रकुमार भट्टाचार्यः

(प्रस्तावना)

भस्मीभूतोऽपि पूर्वं ललितवरतनुर्वह्निना शम्भुनेत्रा-
द्वत्ते योऽनङ्गरूपं त्रिभुवनविजयि प्रेमसत्त्वं विचित्रम् ।
पश्चाद् यो भूतनाथं स्वयमपि कुरुते बन्दिनं हैमवत्या
वन्दे तं मीनकेतुं रतिपतिमतुलं मन्मथं नर्ममित्रम् ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—बुधवृन्दारकान् नौमि रसमञ्जुलमानसान् ।
तेषां विनोदनार्थं हि नवनाट्यं प्रयोज्यते ॥ २ ॥

(नेपथ्याभिमुखम्)

तिष्ठति कुत्र श्रेष्ठनटी दर्शकवन्द्या वल्लरिका ।
वेद्मि विलम्बाच्छ्रोतृमनो यास्यति नूनं मन्युवशम् ॥ ३ ॥

(ततः प्रविशति नटी ।)

नटी—समागताहं द्रुतमेव भद्र
श्रोष्यामि सद्यो भवतो निदेशम् ।
कीदृक्षनाट्यं विदुषां सभायां
प्रयोज्यतेऽद्य श्रुतिचित्ततोषम् ॥ ४ ॥

सूत्रधारः—नवीनमाद्यो रसिकाय रोचते
न हर्षदं स्यात् सततं सनातनम् ।
नवं तु नाट्यं विषये पुरातने
रमाय कश्चिद् गुणिनां नु कल्पते ॥ ५ ॥

नटी—रामायणाख्यं रचितं महाकाव्यं वाल्मीकिनाऽऽदिकविना
रामस्य संख्यं सह रावणेनास्मिन् मन्ये तु मुख्यविषयम् ।
शर्वाणिकायाः प्रणयाभिसारो वै हेतू रणस्य विदितो
नाट्यं नवीनं ह्यवलम्ब्य तं दिष्ट्या मोदं करोतु सुधियाम् ॥ ६ ॥

सूत्रधारः—काव्यकोविदेन श्रीवीरेन्द्रकुमारनाम्ना
नृत्यगीतपूर्णं नाट्यं यद् ग्रथितं सयत्नम् ।
लक्ष्मणाय यस्मिन् प्रेमा राक्षसकन्यकाया
वर्ण्यतेऽभिरामस्तद्वै शूर्पणखाभिसारम् ॥ ७ ॥

नटी— नराणां राक्षसानां तु भेदोऽस्ति बहुलश्चिरम् ।
सूत्रधारः—निराकृतस्तथापि स्यात् स भेदः प्रेममायया ॥ ८ ॥

गीतं तावद् गीयतां वै भवत्या
नारीकण्ठे दिव्यतानं सुरम्यम् ।
प्रेम्णः कीर्तिस्तन्यतां मर्त्यभूमौ
दूरीकर्तुं लोकयोः सर्वभेदम् ॥ ८ ॥

नटी—किन्नरीणां यदप्राप्यं तत् कथं लभ्यते मया ।
भवन्निदेशतस्तावच्चेष्टा च क्रियतेऽधुना ॥ १० ॥

सूत्रधारः—अलं वरेण्ये निजनिन्दयैवं
तवाङ्गवृत्तं लयतालशुद्धम् ।
स्फुरेच्च कण्ठे विकचं सुगीतं
कथं न रङ्गं कुरुषे विमुग्धम् ॥ ११ ॥

नटी—नृत्यतु पादयुगं मे शिञ्जातालैश्चपलं
कण्ठे राजतां वाणीपदाब्जभृङ्गगुञ्जितम् ।
पश्यतु रागविदग्धो मुद्रालीलातरलं
सर्वाङ्गं मम प्रेमोर्मिफेनहास्यपुञ्जितम् ॥ १२ ॥

(नृत्यन्ती गायति)

रश्मि सौवर्णं किरति सूर्यो वसन्ते
   सिन्धोः सुस्निग्धं वहति वात्या दिगन्ते ।
रसालतरौ रुवन्ति पिका मधुरम्
   सुनीलं गगनं विभाति मेदुरम ॥
जागर्ति क्षिप्रं कुसुमकन्या निकुञ्जे
   धत्ते श्यामाभं निचुलकं पत्रपुञ्जे ।
विडम्बयति द्विरेफकुलं विधुरं
   रतिः क्षोभयते स्मरं सुचातुरम् ॥ १३ ॥

सूत्रधारः—मुग्धो रङ्गो नटीमुख्ये कण्ठं श्रुत्वा सुधाक्षरम् ।
   जानक्या वाचमाकर्ण्य यथा दशरथात्मजः ॥ १४ ॥

(निष्क्रान्तौ ।)

इति प्रस्तावना

प्रथमं दृश्यम्

(ततः प्रविशति रामचन्द्रः सीतादेव्या सह ।)

रामचन्द्रः—कण्ठं श्रुत्वा हरिणनयने तावकं कर्णपेयं
   चित्तं यातं त्रिदिवमभि मे रोमहर्षश्च जातः ।
पृथ्व्यां कुत्र श्रुतिपथसृतो दिव्यसङ्गीततानः
   स्मारंस्मारं तव मधुवचो मोक्षमोदं लभेयम् ॥ १५ ॥

सीतादेवी—(सव्रीडम्)
पिता यस्या राजर्षिर्जनको ब्रह्मवेत्ता विपश्चित्
   तथा भर्ता प्राज्ञो दाशरथिः सत्यसन्धो नरेन्द्रः ।
प्रियं ब्रूते सत्यं संश्रयते मैथिलीयं चिरं चेन्-
   न तच्चित्रं स्तोकेनापि यतः कारणं तस्य नाहम् ॥ १६ ॥

रामचन्द्रः—(सस्मितम्)

निजो गुणस्त्वया सदा प्रदर्श्यते पराश्रयः
कथं सकृत् करोम्यहं तव स्तुतिं प्रियंवदे ।
चराचरं सुभासितं सुधानिधिस्मितैर्यदा
प्रभाषते नु कौमुदी प्रभाकरो ममाकरः ॥ १७ ॥

सीतादेवी—किमपि किमपि दृष्ट्वा नाथ सौम्याननं ते
सपदि तृषितचित्तं स्याच्चकोरस्य तुल्यम् ।
मम हृदयजयुग्मं स्फायते रश्मिपीतं
कथमिह तव कान्ता त्वां विनाऽऽस्ते प्रफुल्लम् ॥ १८ ॥

रामचन्द्रः—शङ्कां कृथा न भीरु त्वं क्वास्ति विच्छेदकारणम् ।
ज्योत्स्नाकरश्चिरं तिष्ठेद् रोहिणी यत्र वर्तते ॥ १९ ॥

(ततः प्रविशति लक्ष्मणः ।)

लक्ष्मणः—रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं मार्मिकं
काकुत्स्थं करुणामयं गुणनिधिं शान्तं प्रजातारकम् ।
राजेन्द्रं रविवंशमौलिमसितं विप्रप्रियं धार्मिकं
वन्दे लोकमतं च राक्षसरिपुं यज्ञारिसंहारकम् ॥ २० ॥

रामचन्द्रः—भ्रातरागच्छ सौमित्रे स्वस्ति तुभ्यं स्मितानन ।
ऊर्मिलां स्मरति प्रेम्णा सीता प्रतिदिनं वने ॥ २१ ॥

लक्ष्मणः—(सलज्जम्)

दृश्यतां पुष्पशोभाऽऽर्य पञ्चवट्या मनोरमा ।
रक्ताशोकैः प्रियालैश्च केतकैरपि चम्पकैः ॥ २२ ॥

इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः ।
अदूरे दृश्यते रम्या पद्मिनी पुष्पशोभिता ॥ २३ ॥

रामचन्द्रः—(सस्मितम्)

बाढं बाढं महाबाहो सर्वं रम्यं प्रतीयते ।
अयोध्यानगरीं श्रीमन् विस्मरामि तथापि न ॥ २४ ॥

विस्मर्यन्ते कथं वा नो बन्धुमुख्याः सुबान्धवाः ।
मातरो भ्रातरौ चापि सेवकाश्च शुभार्थिनः ॥ २५ ॥

देशे देशे निसर्गस्य लावण्यं नेत्रलोभनम् ।
जन्मभूमिसमं देशं न पश्यामि मनोहरम् ॥ २६ ॥

दर्शनं रम्यशोभायाः पूर्वसौख्यस्य विस्मृतिः ।
कुत्रापि स्मरणं चैव दत्ते चित्ताय सान्त्वनम् ॥ २७ ॥

सीतादेवी—गोदावरीतटं गच्छ देवदुर्लभ देवर ।
आहृत्य फलमूलानि प्रत्यावर्तस्व सत्वरम् ॥ २८ ॥

लक्ष्मणः—श्रीरामपादनलिने प्रणमामि मूर्ध्ना
देव्या रजश्चरणयोः शिरसा बिभर्मि ।
आयामि कर्म तरसा मम साधयित्वा
भूयाच्छुभः करुणया भवतोर्हि पन्थाः ॥ २९ ॥

(निष्क्रान्तः ।)

रामचन्द्रः—छायेव यो मामनुयाति नित्यं
स्तोकेन न स्वं विगणय्य सौख्यम् ।
भुङ्क्ते च दृष्टो मम दुःखभागं
पश्यामि भद्रे तुलनं क्व तस्य ॥ ३० ॥

सीतादेवी—(गायति)

दुर्लभरत्नं संसारजलधौ गणयामि प्रणयं
कुत्र स मृत्युर्यो संघटयते समये तद्विलयम् ।

पितरौ स्निह्यतः कुसन्तानेषु
सुखितौ दम्पती स्थितौ गेहेषु

मन्मथबाणः पुष्पेण रचितो न तु छिन्ते हृदयम् ।
मर्मसखो यो भ्राता स सततं कुरुतेऽध्यँ निलयम् ॥ २१ ॥

रामचन्द्रः—पीत्वा हि वाङ्मयसुधां पेशलां तवेमां
प्राप्तं मया प्रियतमे चित्तसौख्यमिष्टम् ।
संमन्यते मम मनो मैथिलीमुखेन्दुं
पश्यामि नेत्रयुगलं प्रेमदीप्तिपूर्णम् ॥ २२ ॥

सीतादेवी—उटजान्तर्गमिष्यावो नौ देवार्चनकृतेऽधुना ।
लक्ष्मणे पुनरायाते भोजनं नो भविष्यति ॥ २३ ॥

रामचन्द्रः—(सस्मितम्)

न केवलं त्वं मम मर्मचारिणी
मिथः प्रदत्ते मधुरं रसं हि या ।
अरण्यगेहे किमु राजसद्मनि
समानधर्मा गृहिणी सुमङ्गला ॥ २४ ॥

(निष्क्रान्तौ ।)

इति प्रथमं दृश्यम्

द्वितीयं दृश्यम्

(ततः प्रविशति शूर्पणखा सखीभ्यां सह)

शूर्पणखा—दृष्टो मया महाशूरः पद्मपत्रायतेक्षणः ।
विकटास्ये विरूपाक्षि न समः तस्य राक्षसः ॥ ३५ ॥

विकटास्या—(सस्मितम्)

आलि ते हृदयमद्य भिद्यते
कामिनो नयनबाणधारया ।
पादयोस्तव पतेत् स चेन्नरो
मर्मणो भवति ते व्यथालयः ॥ ३६ ॥

विरूपाक्षी—(सहास्यम्)

यावन्न दृष्टो नायकः काङ्क्षितं दर्शनं मया
दृष्टस्य याचे चुम्बनं चुम्बनान्ते परिष्वजम् ।
जाता परिश्लेषादहो कामना केवलात्मिका
व्रीडात्यये वाञ्छामि नौ भेदलोपं सवेपथुम् ॥ ३७ ॥

शूर्पणखा—दृष्ट्वारण्ये मनुजतनयं श्यामलं सौम्यकान्तिं
शर्वाणीयं सपदि वृणुते नायकं स्वानुरूपम् ।
सर्वाङ्गं मे भवति वदनं जल्पितुं तस्य नाम
रक्षोरामा प्रणयरभसान्मानुषीभां बिभर्ति ॥ ३८ ॥

(गायति)

नृत्यति चित्तं प्राप्य सुवित्तं
दोलायते देहं लतिकाललामम् ।
अन्तरहर्षं वाञ्छितदर्शं
मञ्जीरनिक्वाणस्तनुते प्रकामम् ॥ ३९ ॥

विकटास्या—माल्यं सुग्रथितं कटाक्षकमलैस्तस्या न रक्तोत्पलैः
कुन्दार्घ्यं वरणाय हास्यरचितं पात्रीकृतौष्ठाधरम् ।
श्रोणिभ्यां कदलीयुगं विलसितं धत्ते कुचः कुम्भतां
स्वाङ्गैः स्रष्टुमलं स्मरार्चनकृते सर्वोपचारान् सखी ॥ ४० ॥

शूर्पणखा—(नृत्यन्ती गायति ।)

प्रभातमद्य मे भाग्यं सूचयते भास्करार्चिःप्रसन्नं
प्रियास्यपङ्कजं चित्ते स्फोटयते पुष्पचापांशुधन्यम् ।

विश्वं दिव्यविभं प्रेममाङ्गल्यजन्यम् ॥

दिगङ्गनं मूर्छितं हर्षप्लवोच्छलं
तरुच्छदे कोकिलाः कूजन्ति विह्वलम् ;
अकालमाधवं कालं सङ्कलये हैमहेमन्तपन्नम् ।

छिनत्ति मे यौवनं वक्षोजबन्धनं
गतं तथा जीवनं वैभ्राजनन्दनम् ;

मनोजमन्दिरं जातं वै सहसा मामकं मर्म वन्यम् ।
स्फुरेन्मुहुर्मुहुः सर्वाङ्गे पुलकाद्रामनाम ह्यनन्यम् ॥ ४१ ॥

विरूपाक्षी—वैदूर्यहारं कृत्वा मुखरितं वक्षोजवीचिस्पन्दनैः
काञ्चीलतायाः पीनोद्धतजघने धृत्वा निनादं काञ्चनम् ।
झङ्कारयित्वा मुक्तालिखचिते मञ्जुस्वने त्वं कङ्कणे
प्रोत्क्रम्य मार्गं मञ्जीररणितैर्गच्छेर्विजेतुं वाञ्छितम् ॥ ४२ ॥

(ततः प्रविशतः खरदूषणौ ।)

शूर्पणखा—आयातं भ्रातरौ वीरौ वन्देऽहं खरदूषणौ ।
अग्रजस्यापि मे राज्ञो लङ्कानाथस्य मङ्गलम् ॥ ४३ ॥

खरः—वयं सर्वे कुशलिनो जातं मे किन्तु कौतुकम् ।
स्वसारमत्र पश्यामि गन्तुकामां दिशं क्वचित् ॥ ४४ ॥

दूषणः—भ्रात्रा न दृष्टा किमुत स्वसुर्नः
प्रसाधनाढ्या रुचिराङ्गशोभा ।
यात्रा शुभाऽस्या अनुमीयते मे
रहोनिकुञ्जे मदनार्चनार्थम् ॥ ४५ ॥

विकटास्या—रक्षोवरस्य वाक्यं हि तथ्यमेवानुवर्तते ।
शर्वाणिका वृणोत्यद्य नरश्रेष्ठं स्वयंवरा ॥ ४६ ॥

विरूपाक्षी—प्रेम्णो गतिः स्यात् त्वरिता च तिग्मा
वंशो न जातिर्जनयेत्तु विघ्नम् ।
रक्षोङ्गना चेद् वृणुते नृवर्यं
नौमि प्रकल्पं झषकेतुजुष्टम् ॥ ४७ ॥

शूर्पणखा—(सव्रीडम्)

कन्याहं विदिता मुनेः सुचरिता रक्षःपतेश्च स्वसा
भर्ताऽऽसीन्मम चैकदा गुणिवरो दैत्याधिपः सुन्दरः ।
वैधव्यं घटितं तु भाग्यविहितं भ्रातुर्भ्रमाद् यौवने
चित्तं मे सुचिरं कथं न भवति प्रेमात्यये मर्दितम् ॥ ४८ ॥

दूषणः—लावण्यभूषिते कन्ये दिष्ट्या त्वं वर्धसे चिरम् ।
गच्छाभिसारिके तत्र यत्र तिष्ठति नायकः ॥ ४९ ॥

खरः—जयाय याहि कामं त्वं भगिनि त्रिदशार्थिते ।
दृष्ट्वा ते रूपमाश्चर्यं नारीं मन्येऽद्य मर्कटीम् ॥ ५० ॥

(निष्क्रान्तौ ।)

शूर्पणखा—भगिनीवत्सलावेतौ भ्रातरौ खरदूषणौ ।
　　तयोराशीः पथि स्यान्मे प्रेम्णः पाथेयमूर्जितम् ॥ ५१ ॥

सख्यौ—(गायतः)

उदितमद्य जानीहि कानने वसन्तं
मलयशैलदूतं च शीतलं वहन्तं
　पल्लवासङ्गे प्रसूनराशिं हसन्तं ।
　दण्डकारण्ये भजस्व भानुं लसन्तम् ॥

मधुकरा हि गुञ्जन्ति कुड्मलप्रलुब्धाः
परिसरन्ति हंसाश्च पद्मिनीं विमुग्धाः
　यौवनोद्दामाः स्मरन्ति मारं दुरन्तं ।
　दण्डकारण्ये भजस्व भानुं लसन्तम् ॥ ५२ ॥

शूर्पणखा—(सदर्पम्)

वेद्मीह भेत्तुं नयनेन चित्तं
　हास्यं बिभर्मि स्मरमर्मपेयम् ।
ओष्ठाधरे मे गरलं सुधाक्तं
　प्रेम्णो रणे किं न जयं लभेयम् ॥ ५३ ॥

विकटास्या—अस्तं यातः सरागस्तपनो नभोर्ध्वकृतालिम्पनो
　　राकाचन्द्रो विभाति प्रसितो विनाश्य तमिस्राञ्जनम् ।
वक्षोयुग्मं सरोजाभमहो दुनोति हिमांशुस्तव
　　चेलं किं च प्रियाले मसृणं करं स्वकराभ्यां वरेः ॥ ५४ ॥

विरूपाक्षी—चन्द्रश्चेत्ते तनुक्लेशहेतुर्ज्योत्स्नां पिबेरजस्रं
　　वक्षोन्तस्तत् खरकामवह्निस्तूर्णं लभेत तृप्तिम् ।
चित्तं यायाद्रहः कल्पलोकं यत्रास्ति ते सुकान्तो
　　दीप्त्यां तस्य प्रलीनः शशाङ्कः क्लिश्नाति नैव रामाम् ॥५५॥

विकटास्या—सौन्दर्यं ते तनुतरलितं मर्म मुष्णाति यूनां
चित्तं भाति प्रणयपुलकात् प्रौढपुष्पं कदम्बम् ।
पक्ष्मप्रान्ते स्फुरति मधुपव्यानिषण्णो ह्यपाङ्गो
मन्ये तन्वीं स्मरकरधृतं शाणितं षष्ठबाणम् ॥ ५६ ॥

शूर्पणखा—रूपं दृष्टं प्रतिदिनमहो जन्मतो मे विचित्रं
लुब्धे नेत्रे तदपि कियतीं प्राप्नुतो नात्र तृप्तिम् ।
श्रुत्वा कण्ठं त्रिदिवसुलभं वर्धते कर्णतृष्णा
प्रेमाकूतं जनयति हृदि क्लेशदाहं त्वनन्तम् ॥ ५७ ॥

विरूपाक्षी—श्रित्वा कम्प्रशिखां स्मरो नयनयोस्तस्थौ शिवान्या यदा
शम्भुर्हस्तनखैरुपांशु दलितः केलौ तया निर्घृणम् ।
प्रोन्मत्तो लुलितं पदाब्जयुगलं पत्न्या अचुम्बद् भवः
सैवापाङ्गशिखा ददातु विजयं तुभ्यं रणे साम्प्रतम् ॥ ५८ ॥

शूर्पणखा—अह्वाय यामि मे सख्यौ
श्लिष्यतं मा युवां दृढम् ।
सार्धं मया चलेद्दिष्ट्या
पुष्पेषुर्मन्मथः स्वयम् ॥ ५९ ॥

सख्यौ—(गायतः)
प्रेमसौख्यसारं नौमि तेऽभिसारं
दाशरथिचिन्मोदकेतुम् ।
भूधृतं कलम्बं निक्षिपाविलम्बं
याहि सखि वीरं विजेतुम् ॥ ६० ॥

(सर्वा निष्क्रान्ताः ।)

इति द्वितीयं दृश्यम्

तृतीयं दृश्यम्

(ततः प्रविशति रामचन्द्रश्चिन्तामग्नः ।)

रामचन्द्रः—चित्तं मे भृशमुद्विग्नं विपत्तिर्जायते न वा ।
अनुजस्योत भार्याया विच्छेदः सूच्यते यदि ॥ ६१ ॥

पिता सत्यसन्धो दशरथनृपः कौशल्या गर्भधारिणी
तथा धर्मपत्नी जनकदुहिता सीता चित्तानुचारिणी ।
परं स्नेहशीलश्चिरमनुचरो भ्राता यस्याथ लक्ष्मणः
कथं रामचन्द्रो द्विजपदमतिः सोऽहं प्राप्नोमि शर्म न ॥ ६२ ॥

(ततः प्रविशति शूर्पणखा नृत्यन्ती ।)

शूर्पणखा—(गायति)

सौरवंशदीपं दुर्जनप्रतीपं
श्रीरामं रम्यतनुं भूपगौरवम् ।
नौमि मर्मतोषं रिक्तसर्वदोषं
वन्दे त्वां कल्पतरुं प्रेमसौरभम् ॥ ६३ ॥

रामचन्द्रः—भवती का कुतश्चात्र भवत्या वा समागमः ।
कश्चादेशो भवेदार्ये मां प्रति ब्रूहि सत्वरम् ॥ ६४ ॥

शूर्पणखा—शर्वाणिकाऽहं रावणस्य स्वसा कौतुकेनाख्याता शूर्पणखा
भर्ता ममासीद् दानवेशः पुरा कालकेयो नाम्ना शूरवरः ।
वासोऽधुना मे दण्डकप्रान्तरे वेष्टितो रक्षोभिः शस्त्रकरैः
प्रेमार्थिनीयं राघवस्यान्तिके कामरूपा स्यां ह्यद्याऽनुमता ॥६५॥

रामचन्द्रः—(सस्मितम्)

मादृशानां न भोग्या त्वं सुन्दरि स्थिरयौवने ।
सपत्नीको वसाम्यत्र परदारान् न कामये ॥ ६६ ॥

शूर्पणखा—वीरो नित्यं जगति लभते चित्ररम्यां सुभद्रां
वाञ्छा तस्य प्रबलरभसा नैव जानाति तोषम् ।
श्यामाङ्गीं मां गणय रमणीं केरलीं केलिदक्षां
सौख्यस्वर्गं प्रणयिनमतः प्रेरयिष्यामि जोषम् ॥ ६७ ॥

रामचन्द्रः—अवीरं गणयस्वैनं किं वा वीरं यथायथम् ।
दैवायत्तं भवेद्वीर्यं मदायत्तं शुचिव्रतम् ॥ ६८ ॥

(ततः प्रविशति सीतादेवी ।)

सीतादेवी—(ससन्त्रस्तम्)

आर्यपुत्र कुतो नारी स्वैरचित्ता समागता ।
ईदृशीभिः समं वाचं न कुर्वीत भवान् क्षणम् ॥ ६९ ॥

शूर्पणखा—सीतानाम्नी करालास्या लोलाङ्गी निर्णतोदरी ।
असती च विरूपाऽसौ सदृशी न कथंचन ॥ ७० ॥

इयं प्रभावसम्पन्ना स्वच्छन्दवनगामिनी ।
अहमेवानुरूपा ते भार्यारूपेण पश्य माम् ॥ ७१ ॥

रामचन्द्रः—कृतदारोऽस्मि तन्वङ्गि भार्येयं दयिता मम ।
त्वद्विधानां तु रामाणां सुदुःखा ससपत्नता ॥ ७२ ॥

शूर्पणखा—(सरोषम्)

निगृह्य रम्भां त्रिदिवेशवन्द्यां
न हन्यसे चेत् कुलिशेन दिष्टया ।
अवेहि नैवं मम विप्रकर्तु-
रनङ्गकान्तेरपि तेऽस्ति मोक्षः ॥ ७३ ॥

रामचन्द्रः—क्रोधस्य वा विषादस्य पश्याम्यत्र न कारणम् ।
आर्यचारं क्षमस्वैनं स्वगुणेनैव सुन्दरि ॥ ७४ ॥

अनुजोऽस्ति मम भ्राता शीलवान् प्रियदर्शनः ।
श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ७५ ॥

तं भजस्व विशालाक्षि भर्तारं भ्रातरं मम ।
अनुरूपश्च ते स्वामी सर्वथा स भविष्यति ॥ ७६ ॥

सीता—(विहस्य)

रक्षःकन्ये भजस्वैनं लक्ष्मणं देवरं मम ।
वीर्यशुल्के, महावीर्यो वरो योग्यो न संशयः ॥ ७७ ॥

शूर्पणखा—(रामचन्द्रं प्रति)

पुष्पं त्वयात्तं सितचन्दनाक्तं
देवार्चनार्थं कलितं भवेद् यत् ।
जाने न मूढ प्रणयप्ररिक्त
धूलौ कथं तत् क्षिपसीह नूनम् ॥ ७८ ॥

अथवा—(तिक्तहासं हसित्वा)

गुञ्जागृध्नुर्जगति मनुते रत्नमालामनर्घां
काकीप्रेमा किमिति कुरुते नादरं कोकिलायाः ।
वेत्ति ज्ञानी विमलचरितं योषितां काङ्क्षितानां
भ्रष्टां भुङ्क्ते प्रमितिरहितो मन्दधीरात्मकल्पाम् ॥ ७९ ॥

(प्रस्थिता)

सीता—(विहस्य)

ध्रियते हि वचः सकौतुकं
सरलार्थेन मदान्धवामया ।
भवताऽत्र विडम्बिता तु सा
वरितुं याति रहोऽथ लक्ष्मणम् ॥ ८० ॥

रामचन्द्रः——कामान्धानां भवति नियतं मर्मतापो धरित्र्यां
दोषो न स्याद् विशदमनसा पापिनो विप्रलम्भात् ।
शङ्के भ्रातुः कलुषचरिता प्राप्स्यति स्वीयलभ्यं
सर्वो भुङ्क्ते निजकृतिफलं राक्षसो वा मनुष्यः ॥ ८१ ॥

(निष्क्रान्तौ ।)

इति तृतीयं दृश्यम्

चतुर्थं दृश्यम्

(ततः प्रविशति लक्ष्मणः ।)

लक्ष्मणः—ग्रावाकीर्णैरा: सरससलिला पुण्यगोदावरीयं
प्राप्नोत्याप्रातः प्रणयसुरभिं पादपेभ्यः सपत्रम् ।
प्रच्छायोद्यानैः कुसुमितलतावेल्लितैः सा विधत्ते
चित्तोद्वेगं मे किमपि सहसा मन्मथक्षोभखिन्नम् ॥ ८२ ॥

(सनिःश्वासम्)

अयोध्या त्याजिता साकमग्रजेन मया चिरम् ।
नार्चितं सरयूरोधः क्वोर्मिलाया मुखाम्बुजम् ॥ ८३ ॥

(सान्तर्बाष्पम्)

अयोध्यायामास्ते विरहविधुरा याद्य कृपणा
स्मरामि श्रीलोर्मिं कलसुरधुनीं तां प्रियतमाम् ।
अहं सेवे सीतां रघुकुलनिधिं राममनिशं
न जाने कालं सा कलयति कथं क्लेशपरुषम् ॥ ८४ ॥

(कपालमाहत्य कराभ्याम्)

अदूरदर्शितां धिङ् मे हा सौभ्रात्रमरुन्तुदम् ।
गर्हितं सर्वमत्यन्तमिति प्रोक्तं मनस्विभिः ॥ ८५ ॥

(ततः प्रविशति शूर्पणखा ।)

शूर्पणखा—(नृत्यन्ती गायति)

चित्तं यदा श्रितं सुदुःसहव्यथां
श्रुत्वा न सद्मनः प्रियाङ्गनाकथां

प्राणकुरङ्गः कुरुते रहसि रोदनम् ।

शर्वाणिकामिमां वसन्तदूतिकां
जानीहि नायिकां मनोभवात्मिकां

दारयति तुभ्यं ननु सा परमसान्त्वनम् ।
पूरय भद्र त्वरितं निभृतवाञ्छनम् ॥ ८६ ॥

लक्ष्मणः—(आत्मगतम्)

केयं वराङ्गना चारुः कल्पलोकादुपस्थिता ।
स्वप्नः किं वास्तवाकारं धत्ते मम मतिभ्रमात् ॥ ८७ ॥

(ससाध्वसम्)

मायासत्ताऽपि स्यान्मृगतृष्णिका मर्मोल्लासकारिणी
नेत्रानन्दं चेत् काल्पनिकं तथा मन्दारं नभःश्रितम् ।
रम्भारूपां वै चित्तरमामिमां शङ्के स्वप्नसम्भवां
सृष्टां धात्रा नु प्रस्फुटवाञ्छनैः पुञ्जीकृत्य मामकैः ॥ ८८ ॥

(प्रकाशम्)

मायाकन्ये कथमिह जनं बन्धुहीनं वनेऽस्मिन्
बन्दीकर्तुं दशरथसुतं काङ्क्षसे मोहजाले ।
मर्माकाशे मम तु नियतं द्योतते रामचन्द्रो
नाम स्मृत्वा झटिति ललने बन्धनं ते छिनद्मि ॥ ८९ ॥

शूर्पणखा—(सहास्यम्)

श्रुत्वा वचस्तव द्राङ् मे स्यन्दते हास्यनिर्झरम् ।
कामरूपा स्वयं कन्या बलं दर्शयते परम् ॥ ९० ॥

(नेपथ्याभिमुखं गायति)

हंहो नर्मप्रिये मायया प्राप्तवत्यहं पुष्कलकालं
निर्मातुं शक्यते वै मया कान्तमोहनं काञ्चनजालम् ।
लब्धवत्यहं सद्यो कान्तारे काङ्क्षितकालम् ॥
भ्रूचापान्निक्षिपामि बाणासारं
भिन्ते यो बन्दिमर्म वारंवारं
छिद्यतेऽञ्जसा संद्ये वक्षोरस्तस्य विशालम् ।
मुग्धस्यातो लुठेल्लीलया मत्पदान्तयोर्दीप्रकपालम् ॥ ९१ ॥

लक्ष्मणः—(सरोदनम्)

रक्ष मां जानकीनाथ मायाविनीकराद्द्रुतम् ।

शूर्पणखा—(साट्टहासम्)

जम्बुकीपतिना नेदं छिद्यते मोहजालकम् ॥ ९२ ॥

(ततः प्रविशतः सख्यौ)

विरूपाक्षी—भ्राम्यसि नित्यं सङ्गहीनः कानने
दुःखतमस्ते भद्र पश्याम्यानने ।
प्राणसखी मे मीनकेतोर्मानसी
तां वरितुं त्वं कामरूपामर्हसि ॥ ९३ ॥

विकटास्या—ओष्ठपुटे सा बिभर्ति प्रेमामृतम् ।
यौवनदृप्त त्वया तत् पेयं स्रुतम् ॥ ९४ ॥

सख्यौ—(नृत्यन्त्यौ गायतः)—

मर्मकोषे सखी बिभर्ति सुधानिर्झरं
किं न काङ्क्षसे नायक तत् सत्वम् ।
सर्वदेहे तथा रसोर्मिमदं दुर्भरं
किं न वाञ्छसि प्रेमिक तं च त्वम् ।
चिरयौवनेयं पद्मगन्धा कामिनी
चलमेघपुञ्जे सुस्थिरा सौदामनी
चित्तचौरं त्वां करोति नरं निर्जरम् ॥ ९५ ॥

शूर्पणखा—(सदर्पम्)

दंष्टुं शक्ष्यति नैव कालदशनं कम्राङ्गकान्ति मम
नाभ्यासान्नवतां जहाति विविधं केलौ कलापाटवम् ।
कन्याभिर्ह्यपराभिरल्परभसान्मन्दीकृता कामना
तृप्तेभ्यस्तु ददामि तूर्णमसकृत् तृष्णामुदग्रामहम् ॥ ९६ ॥

लक्ष्मणः—(आत्मगतम्)

रङ्गिणी रसिका नूनं धत्ते प्रोद्भिन्नयौवनम् ।
दोदुल्यते मनो भृशं जायते रोमहर्षणम् ॥ ९७ ॥

विरूपाक्षी—नायं कालो वितर्कस्य चिन्तयसे मुधा रणम् ।
विविक्षुः पतङ्गो वह्निं कुर्यान्न संशयं क्षणम् ॥ ९८ ॥

विकटास्या—सुधाभाण्डं समानीतं प्रेमिकपुरतश्च ते ।
विलम्बेन सुधास्रावः शङ्केऽहं गरलायते ॥ ९९ ॥

शूर्पणखा—आकण्ठं त्वं पिब मम सखे प्रेममाध्वीं रसोग्रां
सौख्यस्वर्गं मरजगति हे यास्यसि त्वं निरन्तम् ।
मायाविन्याः प्रणयमिह को विप्रकुर्यान्मनुष्यो
गाढाश्लेषो नयति सहसा मन्मथं स्वप्नलोकम् ॥ १०० ॥

लक्ष्मणः—(सगद्गदम्)

न सुराङ्गनापि सुषमां बिभर्ति ते
प्रणयोऽद्य ते विजयते सुतन्विमाम् ।
तरसा प्रदेहि दयिताय चुम्बनं
त्रिदिवं लभेऽत्र तव देहसन्निधौ ॥ १०१ ॥

शूर्पणखा—(सानन्दम्)

सन्निधेः का कथा कान्त भेदो यास्यति देहयोः ।
प्रस्फुटति प्रसूनं हि प्रेमरूपं प्रभास्मितम् ॥ १०२ ॥

लक्ष्मणः—(गायति)

प्रातरद्य मम स्वागतं हि वराङ्गने
दृष्टं मया यत् तव मुखप्रसूनम् ।

जीवनं सफलं यौवनं हि तवार्हणे
दक्षो दिगन्तस्तनुकरेण नूनम् ॥
प्रान्तरं जातं मे प्रसन्नभवनं
प्रोषितो धत्ते च प्रफुल्लवदनं
गृह्यतां हृदयं मोहितं मदिरेक्षणे ।
मन्मथो रमताम् आवयोर्मिलितार्थने ॥ १०३ ॥

(हस्ताभ्यां गृह्णाति करौ शूर्पणखायाः)

झटिति किमपि किरति सुहसमतनु-
र्लसति मुखमपि तव सखि सह मया ।
नयनविशिखमिह न कुरु विषयुतं
तव चरणयुगमयि मम हि शरणम् ॥ १०४ ॥

(पादयोः पतितुमुपक्रमते ।)

शूर्पणखा—(निवार्य गायति)
अद्यप्रभृति प्रभो ते प्रेष्यैवाहं
सद्यो हि निराकृथा मे वक्षोदाहं
न जानाम्यतः संसारे बान्धवं द्वितीयम् ।
मन्ये हृदयं निजं ते नर्मावासं
चित्तं तव किं न यातं शर्माभासं
कृपां याचते कान्तारे सौम्य कर्बुरीयम् ॥ १०५ ॥

सख्यौ—मिलनमङ्गलं सख्यौ गास्यावो वां चिरन्तनम् ।
गान्धर्वविधिना कन्या प्रियं वरयते जनम् ॥ १०६ ॥

रामचन्द्रः—(नेपथ्ये)
कुत्रास्ते लक्ष्मणो भ्राता जितेन्द्रियो महारथः ।
स्वैरिण्या मोहपाशं स छेत्तु शक्नोति निश्चितम् ॥ १०७ ॥

लक्ष्मणः—(विह्वलः)

उदात्तकण्ठं श्रुतमत्र कर्णे
भ्राताऽग्रजो मे कुरुते निषेधम् ।
कुर्वेऽधुना किं क नु वा श्रयेऽहं
विघ्नं विचित्रं सहसोपनीतम् ॥ १०८ ॥

(सनिःश्वासम्)

द्वैधीभूतं चकितमिह मे हन्त कर्तव्यमिष्टं
भ्रातुर्वाक्यं भवति नियतं पालनीयं मयैव ।
किन्तु प्रेमा परमरुचिरो नार्हति व्याजचारं
को रक्षेन्मामुभयविपदोर्मूढतां याति चित्तम् ॥ १०९ ॥

(ध्यात्वा)

मुञ्च मां सुन्दरीवर्ये गच्छामि भ्रातृसन्निधिम् ।
क्षमस्व मम चापल्यं कृपया विस्मराधमम् ॥ ११० ॥

(शूर्पणखायाः पादयोः पतति ।)

शूर्पणखा—(विहस्य)

न भृत्यकल्पस्त्वमसि प्रभो मे
तवाग्रजोऽसौ ननु रामचन्द्रः ।
स किं मनुष्यो दयितां त्यजेद् यः
सकृन्निरुद्धः प्रणयाद् व्यलीकम् ॥ १११ ॥

विरूपाक्षी —भृत्यं रामस्य जानीहि सुमित्रासुत-लक्ष्मणम् ।

विकटास्या—सीतायाः पादयोर्यस्य जीवितं चित्तमर्पितम् ॥ ११२ ॥

शूर्पणखा—(सनिर्बन्धम्)

न खलु न खलु कान्त प्रेयसीं मा त्यजेस्त्वं
क्षणमपि मम लब्धं प्रेमवर्चः प्रदीप्तम् ।
क्व नु कुसुमितचित्तं योषितोऽस्याः सरागं
क्व च बत विरहार्तं जीवनं दुःखदिग्धम् ॥ ११३ ॥

रामचन्द्रः—(नेपथ्ये)

धर्मपत्नी तव श्रीमन् सरयूतीरवासिनी ।
ऊर्मिलामेकवेणीं तां कथं त्वं विस्मरिष्यसि ॥ ११४ ॥

शूर्पणखा—(सधिक्कारम्)

तर्हि मिथ्याव्रतो रामो येनाहं वञ्चिताऽबला ।
वञ्चकस्य वचः कर्तुं स्थितधीः नार्हसि प्रिय ॥ ११५ ॥

रामचन्द्रः—(नेपथ्ये)

इमां रूपवतीं रौद्रां सुरामत्तां कुभाषिणीम् ।
स्वैरिणीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ ११६ ॥

शूर्पणखा—पापकर्मा भवेद्रामो भूपेन्द्रकुलपांसुलः ।
अनुजस्तस्य किं कुर्यादनुरूपं कथञ्चन ॥ ११७ ॥

लक्ष्मणः—हा हा धिङ् मे जगति जननं रामभद्रानुजस्य
कान्ताया यः श्रवणयुगलं नासिकां छेत्तुकामः ।
क्रूरादेशं कथमहमये पालयामि स्वतन्त्रः
क्षन्तव्योऽयं सखि खरनरः क्षात्रधर्मप्रतीपः ॥ ११८ ॥

शूर्पणखा—गणयामि स्वयं कान्त कर्णहीनां विनासिकाम् ।
विरूपां मन्यसे मां चेल्लप्स्येऽहं गुरुपीडनम् ॥ ११९ ॥

भृशं प्रीणयते मां ते हृत्पूर्वमनुशोचनम् ।
क्षणासङ्गः करोत्येव प्रेमिकां मां चिरन्तनीम् ॥ १२० ॥

लक्ष्मणः—कृतार्थम्मन्यतां याति लक्ष्मणोऽयं तवाश्रवः ।
मणिकोषे स्मृतेर्नित्यमर्चयामि प्रियामुखम् ॥ १२१ ॥

शूर्पणखा—वराकीयं कृता धन्या प्रेमकोरकपूजिता ।
कष्टैः शतैरपि स्यान्न कर्बुरी क्वापि कातरा ॥ १२२ ॥

लक्ष्मणः—यास्यामि कान्ते विपिने कुटीरं
भाग्यं विनिन्द्य प्रणयप्रकम्पः ।
श्रेयो लभस्व स्वजनाश्रये त्वं
मा भूत् तवैवं भुवि विप्रलम्भः ॥ १२३ ॥

(निष्क्रान्तो धीरपदेन)

विरूपाक्षी—कृतघ्ना मानवा नित्यं प्रणयस्तैर्न सम्मतः ।
मनुष्यहृदयासक्ते चिरं रोदिषि खण्डिते ॥ १२४ ॥

विकटास्या—करिष्यतः प्रतीकारं भ्रातरौ खरदूषणौ ।
स्थानादस्माद् गमिष्यामस्तत्सकाशं वयं द्रुतम् ॥ १२५ ॥

शूर्पणखा—प्रणयस्तस्य लब्धो मे प्रतिशोधस्य का कथा ।
सुखं जीव्यान्महावीरो लक्ष्मणो नरपुङ्गवः ॥ १२६ ॥

(निष्क्रान्ता)

विकटास्या—कथं सखी नौ प्रणये विडम्बिता
मनाङ् न रुष्टा खललक्ष्मणं प्रति ।
वयं नरेभ्यो नियतं महत्तराः
प्रवञ्चकान् धिङ् मनुजांश्च निर्दयान् ॥ १२७ ॥

विरूपाक्षी—लक्ष्मणं प्रेमिकं मन्ये गरीयांसं नरान्तरात् ।

शूर्पणखा—(नेपथ्ये) (सरोदनम्)

हा! सख्यौ कर्तितौ बाणैर्मम कर्णौ सनासिकौ ॥ १२८ ॥

विकटास्या—नूनमिदं महापापं रामानुजेन साधितम् ।

विरूपाक्षी—द्रुतं गच्छावो यत्रास्ते शूर्पणखा विमर्दिता ॥ १२९ ॥

(त्वरितपदेन निष्क्रान्ते ।)

इति चतुर्थं दृश्यम्

पञ्चमं दृश्यम्

(ततः प्रविशतः खरदूषणौ ।)

खरः—भ्रातर्दूषण का वार्ता लङ्काधीशस्य वाहिता ।
जम्बूद्वीपं विजेतुं किं रावणश्चेष्टते स्वयम् ॥ १३० ॥

दूषणः—वने दण्डके ते प्रभुत्वं समन्ता-
न्नराणां विधत्ते प्रभूतां विशङ्काम् ।
तदाकर्ण्य भूपो भृशं याति तोषं
मया वाहिता तत्प्रशस्तेः सुवार्ता ॥ १३१ ॥

खरः—शौर्यं नो रक्षसां नित्यं लभते सर्वतो जयम् ।
दैवस्य विजयो मूढैर्मानुषैर्घोषितो भुवि ॥ १३२ ॥

(ततः प्रविशति शूर्पणखा नासाकर्णहीना ।)

खरः—(ससम्भ्रमम्)

विकर्णा नासिकाहीना केयं शूर्पणखासमा ।
कुत्र लब्धा त्वया बाले दुर्दशेयं वने मम ॥ १३३ ॥

दूषणः—(सक्रोधम्)

मृत्युमाह्वयते युद्धे को नु मूर्खो दुराशयः ।
यक्षो नरः पिशाचो वा फलं योग्यं हि लप्स्यते ॥ १३४ ॥

शूर्पणखा—(रुदित्वा)

गुप्तस्य शत्रोर्निशितैः शरैर्मे
छिन्नौ सनासौ सहसैव कर्णौ ।
रामः सदारोऽत्र वसत्यरण्ये
प्रेष्यस्तदीयो मम रूपनाशी ॥ १३५ ॥

(ततः प्रविशतो विरूपाक्षी विकटास्या च ।)

विरूपाक्षी—लङ्केशभगिनी रामा तरुणी वरवर्णिनी ।
रामानुजस्य हस्तेऽद्य हन्त सा रूपवञ्चिता ॥ १३६ ॥

विकटास्या—जाल्मस्य वाक्यं मधुरं विलोलं
स्फूर्तं च तस्य प्रणयार्द्रचित्तम् ।
व्याजेन मुग्धां कुरुते स्ववश्यां
छिनत्ति पश्चात्तु शरैः स गात्रम् ॥ १३७ ॥

शूर्पणखा—मैवं वदाम्बुजास्ये त्वं लक्ष्मणो मम नायकः ।
विरूपां कृतवान् मां तु तस्य ज्येष्ठो न संशयः ॥ १३८ ॥

दूषणः—हन्त दाशरथी हन्ता रामो वा लक्ष्मणः स्वयम् ।
समूलघातमद्यैव हनिष्यामो रणे द्वयम् ॥ १३९ ॥

शूर्पणखा—(सरोषम्)

द्वेष्टा मम रामः सीतापतिर्यो
मिथ्याकथनं यो वेत्ति प्रशस्यम् ।
निर्यातयितुं स्त्री यस्याभिलाषः
स ह्रीरहितो मां छिन्ते मयूखैः ॥ १४० ॥

खरः——करोति कामं फलमूलभोगं
चिरं विधत्ते मुनिविप्रसेवाम् ।
बिभर्ति रूपं रतिनाथतुल्यं
तथापि रामः पिशुनो हि नान्यः ॥ १४१ ॥

शूर्पणखा——भ्रातरो मे खरः शूरो दूषणश्च परन्तपः ।
लङ्केशो रावणो यस्य तुला भुवि न दृश्यते ॥ १४२ ॥

कुम्भकर्णो महावीरः सुधीः स च विभीषणः ।
तथाप्यहं धर्षितास्मि नरैः क्व शरणं मम ॥ १४३ ॥

दूषणः——(सस्नेहम्)

रोदनं मा कृथा जाते प्रतिशोधो भवेद् द्रुतम् ।
वक्षोरक्तं हि रामस्य रञ्जयेत्ते पदाङ्गुलीः ॥ १४४ ॥

विकटास्या——भगिनीं ते कुवाक्येन सीता चापीडयद् भृशम् ।
विधेयो निग्रहस्तस्या भगिन्याः सान्त्वनाय नः ॥ १४५ ॥

विरूपाक्षी——दुर्भाषापि सुरूपा सा यौवनस्वर्गवल्लरी ।
हरन्तु राक्षसाश्चामूं विनोदार्थमिहात्मनाम् ॥ १४६ ॥

दूषणः——मन्ये सीतां जनकतनयां मानुषीणां ललामं
लङ्केशस्य प्रणयलषिता सा भवेदङ्कशोभा ।
दर्पस्तस्या लुठति धरणौ किं च दम्भो नराणां
रक्षःकीर्तिर्जगति तनुते सत्वरं शौर्यहेतोः ॥ १४७ ॥

सख्यौ—नरै रक्षःकन्या रुचिरचरिता निष्ठुरं विप्रलब्धा
ज्वलत्वस्मत्क्रोधो निखिलदहनो दाववह्निर्दुरन्तः ।
द्रुतं भस्मीभूयान्मनुसुतदलं पांसुलं क्षात्रवंश्यं
प्रतीकारो नूनं भवति विषमस्तृप्तये नो भगिन्याः ॥ १४८ ॥

दूषणः—संकटकारणं नृणां शूर्पणखाविगर्हणम् ।
अश्मानोऽपि जनस्थाने रुदन्ति रामकश्मलात् ॥ १४९ ॥

खरः—वचः शूर्पणखे भ्रातुर्निष्फलत्वं न यास्यति ।
किमन्यत्ते करिष्यामि प्रीतिकारि वदाञ्जसा ॥ १५० ॥

शूर्पणखा—(सहर्षम्)

अतः प्रेयो न किञ्चिन्मे भ्रातरौ भगिनीप्रियौ ।
भूयाद् भरतवाक्यं च तथापीदं भवेच्छया ॥ १५१ ॥

(भरतवाक्यम्)

आर्याख्या मनुजास्त्यजन्तु तरसा मिथ्याव्रतं पैशुनं
जम्बूद्वीपनिवासिभिः शुभकृते सम्प्रीतिराश्रीयताम् ।
सौभ्रात्रं शुचि दास्यदोषरहितं गेहेषु देदीप्यतां
मौहूर्तं मिलनं यदि प्रणयजं नित्यं पदं प्राप्नुयात् ॥ १५२ ॥

(जवनिकापातः)

॥ समाप्तमिदं नाटकं शूर्पणखाभिसारम् ॥

बंगलादेशविजयः (व्यायोगः)

"पद्म" शास्त्री

मङ्गलाचरणम्

क्षीरोदप्रभवं निकृष्टगरलं नेत्रे निमील्य क्षणात्
पीत्वाऽयं प्रलयङ्करः पशुपतिर्देवाधिविघ्वंसकः ।
कैलासप्रणयी च दर्पकजयी, भस्मासुरेभ्यस्तथा
भक्तेभ्यश्च विभूतिदाननिपुणः श्रीशङ्करः पातु नः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—(समन्तादवलोक्य) अहो! रमणीयता सुप्रभातस्य । तथा हि-

ईषल्लोहितपद्मरागकिरणैर्भृङ्गान्समुन्निद्रयन्
अब्जान्प्रागतिकांश्च बोधनपरः संवर्तकः खेचरः ।
कोकानाकुलितान्समस्तविहगानानन्दयन्सर्वतः
भास्वानेष महीतले वितनुतां सन्मङ्गलं प्रोद्गतः ॥ २ ॥

(नेपथ्याभिमुखमवलोक्य) क एष प्रसन्नवदनः सज्जनः समायाति?

(ततः प्रविश्य पुरुषो लिखितमर्पयति ।)

सूत्रधारः—(विमृश्य वाचयति ।) समागच्छन्नस्ति श्रीमान्बङ्गबन्धुर्मुजीबः ।

स्वजनजननियन्ता विद्विषां दर्पहन्ता
यवनकुलविभूषः शान्तिदूतः पृथिव्याम् ।
निखिलधरणिजानां देववद्वन्दनीयो
निज-पर-दयितोऽसौ बङ्गबन्धुर्मुजीबः ॥ ३ ॥

तदिदानीं भवता वीररसाद्भुतं रूपकमभिनीय भरतवंशप्रमुखास्मत्परिषदानन्दनीया । किन्नाम तादृशं रूपकम्? (स्मृत्वा) आः! ज्ञातम्!

सुदूरमुत्तराराण्ये पिथौरागढ़मण्डले ।
सुरम्यश्चास्ति सिङ्गाली-ग्रामः प्रकृतिसुन्दरः ॥ ४ ॥

तस्मिन्राजगुरुग्रामे बदरीदत्तसंज्ञकः ।
वसति स्म बुधः श्रेष्ठः कोऽपि भागवतः परम् ॥ ५ ॥

तत्सूनुः "पद्म" शास्त्रीति विद्वच्चरणपूजकः ।
विज्ञः काव्यरसस्यास्ति शासनेन पुरस्कृतः ॥ ६ ॥

तेन कृतो बङ्गलादेशविजयो नाम व्यायोगोऽभिनेतव्यः । (नेपथ्याभिमुखमवलोक्य) कः कोऽत्र भोः !

(प्रविश्य)

पारिपार्श्विकः—भाव ! को नियोगः ?

सूत्रधारः—आहूयतां बङ्गलादेशविजयाभिनयकुशलो नटवर्गः ।

पारिपार्श्विकः—तथा (इत्युक्त्वा निष्क्रान्तः ।)

सूत्रधारः—(प्राचीमवलोक्य स्मित्वा)

चिरमज्ञातः कोऽयं कालवशान्मेदिनीपृष्ठे ।
दलयन्नुदयति हंहो ! गाढं ध्वान्तं मुजीबमिव ॥ ७ ॥

(ततः प्रविशति बङ्गबन्धुना सह प्रधानामात्यः अहमदः)

प्रधानामात्यः—(सोत्साहम्) अनुकूलं दैवं लक्ष्यते । यतः-

रिपुरेष समायाति निजराष्ट्रविभेदकः ।
याह्याखान् , भ्रातृभिः सार्धं योद्धुमिच्छति संगरे ॥ ८ ॥

सूत्रधारः—(सहर्षमवलोक्य) अहो ! परिगृहीतवीरवेषा स्वसाधनसज्जिता मुक्तिसेना, बङ्गलादेशमुक्तये कृतसङ्कल्पा ह्यभिप्रवृत्ता । तदहं पात्रान्तराणि प्रगुणयामि ।

(इति निष्क्रान्तः ।)

इति प्रस्तावना ।

प्रधानामात्यः—(सहर्षम्)

आबालवृद्धवनितावृतमुक्तिसेना
नूनं जवेन भविता विजयाय सा नः ।
साहाय्यदाननिपुणा समरोत्सवार्थं
मित्राणि सन्ति तदलं च समर्थनेन ॥ ९ ॥

मुक्तिसेनापतिः—कथं नास्माकं ध्वजिनी रविरिव प्रतिदिवसोपजायमानोदया, पश्चिमपाकोल्लूकसैनिकानां, हठात्पाकसेनापतिप्रणोदितानां ध्वंसने समर्था । अस्मन्मुक्तिसेनायां तु तावत्

वीराः सन्ति सहस्रशो रणकलाभिज्ञाः समन्ताद्रिपोः
सैन्यध्वंसकराः प्रताडनपरा राष्ट्रस्य संरक्षकाः ।
धीरा धर्मरणोत्सुकाः प्रतिदिनं लग्नाः प्रशिक्षाविधौ
शक्ताः सम्प्रति सत्वरं स्वविधिना युद्धस्य सञ्चालकाः ॥ १० ॥

(ततः प्रविशति विदेशसचिवो महमूद-आलमः)

विदेशसचिवः—हन्त! कथं भवन्तौ स्वतन्त्रबङ्गलादेशनिर्माणकौतुकिनौ विचारविमर्शपरावत्र तिष्ठतः? सम्प्रत्येव मया स्वगुप्तचरवितन्त्री-सङ्केतेन ज्ञातं यत्पश्चिमपाकस्य नवायुधसज्जिता प्रबला सेना बङ्गला-राष्ट्रभक्तान् विदलयितुमुपसीममाजगाम ।

(सेनापतिः प्रकुपितः सन् सत्वरं रङ्गस्थलान्निर्गच्छति ।)

(नेपथ्ये)

---

१. वयरलेस ।

सचिवः—हा! नूनमदूरे पाकबलम् । यतः

'टेङ्क्-'यानोत्कटगर्जितेन धरणी दोधूयमाना क्षणाद्
ज्वाला धूममया वमन्ति नभसस्तद्वायुयानानि हि ।
ग्रामेषूद्गत एष वै कलकलश्चाग्न्यस्त्रपातोद्भवः
सैन्यक्षिप्तचतुर्दिशं प्रति शतघ्नीनां ध्वनिः श्रूयते ॥ ११ ॥

अपि च

मतैश्चात्र निर्वाचितं बंगबन्धुं
प्रहृत्य प्रजातान्त्रिकं शासनं च ।
खलः कोऽपि गर्वोन्नतो दुष्टबुद्धि-
र्मुधा स्वानुजान्हन्तुकामः प्रवृत्तः ॥ १२ ॥

प्रधानामात्यः—(विदेशसचिवं प्रति)

आः! किं न ज्ञातं भवता यत्पश्चिमपाकसेना तु पूर्वं, प्रथिते भारतपाकसंगरे भृशमवमर्दिता भर्त्सिता च भारतभटैः । परं चामेरिकया निरन्तरं प्राज्यशस्त्रास्त्रप्रसाधनैः पुनर्वारवधूरिवालंकृता सा । अहो! किं तेऽपि दुष्टसेनापतेरिंगितेन समानकुलप्रसूतानां, सर्वदोपेक्षितानां चास्मन्निर्धनजनानां कदने कृपालवो न भविष्यन्ति?

सचिवः—(हसन्) श्रीमन्!

खरः सिंहपदं प्राप्य नेक्षते स्वहिताहितम् ।
अधिकारप्रमत्तानां क्व धर्मः क्व च निर्वृतिः ॥ १३ ॥

प्रधानामात्यः—(सविषादम्) सत्यमेव कथयति भवान् ।

जातावावामेकदिने स्वतन्त्रौ धरणीतले ।
परं विपरिणामेऽस्मिन्क्व पाकः क्व च भारतम् ॥ १४ ॥

(नेपथ्ये)

अनुजमुपजिघांसुश्चाग्निचूर्णेन राष्ट्रं
निजकरकृतपापं दग्धुमेवोत्सुकः सन् ।
रणभुवि रिपुकालो व्यालतुल्यः करालः
सपदि भटसहायैरेष जन्ये प्रवृत्तः ॥ १५ ॥

(प्रधानामात्यो नभोवाणीयन्त्रेण बंगलाराष्ट्रस्य कृते स्वसन्देशं प्रसारयति ।)

शृणुत जननिजाताः! राष्ट्रसंपोषका भोः
भवत भवत योद्धुं सज्जिताः संगरेऽस्मिन् ।
जननिहितकृतां नो नूनमादौ विनाशः
तदनु च विजयश्रीर्निश्चिता नः पृथिव्याम् ॥ १६ ॥

अपि च—

निःसीमशोकाकुलमानसानां कदर्थितानां वनिताननानाम् ।
नृत्यत्कराग्रैर्मदघूर्णितोऽयं रक्तासवं पास्यति सज्जनानाम् ॥ १७ ॥

तथा हि—

किमत्र चित्रं यदि दुर्मुखोऽयं नूनं प्रतन्यात्प्रवनं पृथिव्याम् ।
विश्वस्थितिः का भविता भविष्ये काऽस्मद्दशा तस्य कथा च का स्यात् ॥ १८

(नगररक्षका नागरिकान्प्रबोधयन्तस्तारस्वरैः)

भो भो नागरिकाः! प्रशिक्षणपराः! राष्ट्रस्य रक्षाविधौ
सज्जास्तिष्ठत गण्डशैलजनितैः प्रक्षेपणास्त्रादिभिः ।
सर्वे प्रागतिकाः स्ववेश्मनिकटे कृत्वाशु भूगह्वरं
प्रत्यूहे समुपागते विशत भोः शङ्कान्विताः सर्वदा ॥ १९ ॥

(नेपथ्ये)

इन्द्राद्या नाकपृष्ठस्थाः समरालोकनोत्सुकाः ।
सन्ति, तत्रभवान्युद्धं प्रधानामात्य! दर्शय ॥ २० ॥

(ततः प्रविशति विद्याधरसहित इन्द्रो नारदश्च)

इन्द्रः—(साश्चर्यम्)

बलरहितेऽस्मिन्योद्धुं बहुभिर्बलिभिः प्रभूतशस्त्रास्त्रैः ।
निश्शस्त्रैः सह समरे, समरव्यसनी समागतः कोऽयम् ॥ २१ ॥

प्रधानामात्यः—(सविनयं प्रणमन्)

भगवन्! प्रजातन्त्रपातकिना प्राप्तामेरिकासाहाय्येन दृप्तेन पाक-सेनापतिना, स्वराष्ट्रसंसदि, बंगलादेशबहुमतं वीक्ष्य 'भुट्टो'रिंगितेन चास्मज्जन-तन्त्रप्रणयिनामुपरि बलाद्विध्वंसकात्मकमेतज्जन्यमायोजितम् । जन्येऽस्मिन् भयाकुला जनताः स्वपूर्वपुरुषोपार्जितवैभवस्य विनाशेन, पुनः स्वस्वतन्त्र-राष्ट्रमागन्तुकामाश्चेदानीमशरणशरणदायिनं भिन्नराष्ट्रं भारतं प्रति प्रस्थिताः । युवकाश्च योधनपराः सन्ति । निरीक्षतां तावच्चात्र दुष्टकृतं विनाशम् -

अन्तर्निगूढहुतभुग्वमगोलकैश्च
दग्धानि वेश्मतरुभूरुहशाद्वलानि ।
श्वानास्तथा बलिभुजो विचरन्ति शश्वद्
ग्रामाश्श्मशानमिव बिभ्रति धूमकेतून् ॥ २२ ॥

अपि च-

वृक्षा विहंगरहिता जनशून्यगेहाः
मार्गाः श्रृगालकरटैरवचिह्निताश्च ।
चिन्वन्त एव विजयश्रियमत्र योधाः
द्वित्राश्चरन्ति सभया मदविह्वलास्ते ॥ २३ ॥

तथा हि-

प्राणप्रियामपि धरामपहाय तूर्ण-
मारोप्य बालमबलाः कुलभारमङ्कम् ।

हा दुर्विधे! विलसितेन तवाद्य नूनं
रक्ताश्रुपूर्णनयनाः क्व जना व्रजन्ति ॥ २४ ॥

विद्याधरः—(साश्चर्यम्) सत्यमेव द्वितीयविश्वयुद्धादपि हृदयविदारकमेतत् । हा! न केनापि साहाय्यं दत्तं स्वतन्त्रताभिलाषुकायास्मै । युद्धस्यावरोधनाय च न प्रयतितं केनापि? । क्व गता सा विश्वशान्तिसेना? हंहो! संयुक्तराष्ट्रसंघप्रेक्षका अपि वस्तुस्थितिं न प्रकटितवन्तः । क्रूरचेष्टितमिव विधेर्विधानं दृश्यते । यतः-

आधिव्याधिप्रतप्तानामशक्तानां क्व जीवनम् ।
बलिभिस्तु निहन्यन्ते सर्वदा निर्बलाः प्रजाः ॥ २५ ॥

नारदः—त्रिदशेन्द्र! अहं तु पृथिवीवलयं पर्यटामि । पञ्चवर्षपूर्वमेव भारतेन समं युद्धं कुर्वता पाकेन किं नापकृतम्? कथं न भारतेन तस्योन्मत्तस्याखर्वगर्वं चूर्णीकृतम् । जगति शान्तिसंस्थापनायात्र बाहुबलैर्विजितामपि भूमिं ताष्कण्ठसमयानुसारं तस्मै सादरं समर्प्य तद्विपरिणामे प्राप्तं प्रतिदिनं स्वसीमासु गोलिकावर्षणं जनधनाहरणं च भारतीयभटैः । दुष्कृतानां तु विनाश एवोचितः पृतिव्याम् । यतः-

रामेणामितविक्रमेण निहताः पौलस्त्यवंशोद्भवाः
श्रीकृष्णेन कदर्थिताः कुकृतिनः कंसादयः कौरवाः ।
लोके विश्रुत आशुतोषविहितो भस्मासुराणां वधः
दुष्टानां तु विनाश एव धरणौ संश्रेयसे सर्वदा ॥ २६ ॥

अपि च

जगति जनमनांसि द्राक्प्रबुद्धानि कृत्वा
स्वयमपरसहायो बङ्गलादेश एषः ।

रिपुबलमपकर्षन्दीर्घकालं धरित्र्या-
मतिरभसविनाशेनोन्नतः प्रत्यहं सः ॥ २७ ॥

इन्द्रः—सत्यमेवाभिहितमत्रभवता । पश्यतैतेषां देशानुरागम्-

विपदि विदितधैर्याः शत्रुभिस्ताड्यमानाः
दृढमुरसि शतघ्नीघातमालाकुलास्ते ।
रिपुकृतकदनेनाङ्ग ! मृत्युं प्रपन्नाः
जयतु जगदुरित्थं बङ्गलादेश एषः ॥ २८ ॥

प्रधानामात्यः—भगवन् ! दर्पितस्यास्य प्रतिवेदनानुसारमप्यस्माकं द्वादशलक्षजना निहताः, नवतिलक्षजना निर्वासिताश्च । सप्तशतं ग्रामा धूलिसात्कृताः । प्रौद्योगिकसंस्थानसञ्चालनस्य तु का कथा यत्सामान्यजनजीवनमपि विघटितं जनानाम् । परमस्मन्मुक्तिसेनयापि हिमवानिव धैर्येण स्थीयतेऽस्मिन्धर्मयुद्धे । एतेषामदम्योत्साहेन त्यागेन वा जगति कस्यचिन्नूतनस्येतिहासस्य संरचना जन्यते । यस्येतिहासस्य कथा स्वतन्त्राभिलाषुकान्सर्वदा प्रेरयिष्यति स्मारयिष्यति च स्वतन्त्रराष्ट्रव्रतिनां शौर्यं धैर्यं साहसं च ।

इन्द्रः—सत्यमेवाभिहितं भवता ।

नारदः—पाकशासन ! पाकशासनेन कदर्थितानां शरणार्थिशिबिराणां निरीक्षणमपि प्रसङ्गवशात्कर्तुमिच्छामो वयम् ।

इन्द्रः—कथं न, त्वर्यतां त्वर्यतां देवर्षिप्रवर !

(नेपथ्ये)

मानाशिबिरमन्वेष्टुमागच्छन्ति सुरर्षयः ।
पूर्वबङ्गस्थितिं दृष्ट्वा सावधाना भवन्तु ते ॥ २९ ॥

(ततः प्रविशति सुरक्षामन्त्रिणा सह भारतप्रधानमन्त्री गान्धिः)

इन्दिरागान्धिः—(माल्यमर्पयन्ती)

सुस्वागतं चात्र समागतानां देवर्षिविद्याधरनाकजानाम् ।
आलोक्यतामत्र सुखेन पाककृतं विनाशं शरणागतानाम् ॥ ३० ॥

तथा हि—

दृष्टिक्षेप इतः कथं न विहितः ? पाकास्त्रसंभर्जिताः
रुग्णाः सन्ति सहस्रशो हि शिबिरेष्वस्मन्निरीहा जनाः ।
धावन्तः प्रजवेन भारतममी दैनन्दिनं व्याकुलाः
नाधिं किं जनयन्ति भारतकृते लोकस्य किं वा कृते ॥ ३१ ॥

नारदः—सत्यमेव कथयति चात्रभवती । (शिबिरनिरीक्षणपरं केनेडिमहोदयमभिलक्ष्य) वस्तुतो मानवकृताममानवीं भयावहां स्थितिमिमां विलोक्यापि मौनमेवाकलयन्ति विश्वराष्ट्राणि !

यतः—

मूका मुस्लिमवंशजा हि धरणौ नो कुर्वते भर्त्सनां
साहाय्यं च वितीर्यते रिपुकृते धर्मान्धधूर्तैः परम् ।
कामं मौनमुपासते कथमिमे हा राष्ट्रसंघो मृतः
किं लोके कलिरागतः सुकृतिनो लुप्ताश्च किं भूतले ॥ ३२ ॥

इन्द्रः—(बंगलादेशं प्रति विश्वराष्ट्रौदासीन्यं विलोक्योन्मनाः)

ऊ-थांटोऽपि महासभापरिषदश्चाध्यक्षतां निर्वह-
न्नास्मिन्नद्य मनाग्दयां प्रकुरुते न व्याकुलाऽमेरिका ।
लोके सज्जनमानदाननिरतो मर्त्याधिकारान्मुहुः
संरक्षन्नधुना भृशं प्रकुपितो रूसः परं दृश्यते ॥ ३३ ॥

इन्दिरागान्धिः—शान्तं पापम् । मा मैमम् । जानात्येव श्रीमन्तो भवन्तः सत्याहिंसयास्माभिः स्वतन्त्रता समुपार्जिता । संकटेऽस्मिन्पुनरपि वयम्-

सत्यस्यास्य समर्थनं क्षितितले बोभूयते सर्वदा
नीचा विद्युदिव स्फुरन्ति गगने कृष्णाम्बुगर्भाशयाः ।
मन्देहादिभिरावृतोऽप्यतिखरः प्रद्योतपुञ्जं दधद्
भास्वान् सोऽयमुदेति किं न धरणौ भित्वान्धकारोच्चयम् ॥ ३४ ॥

विद्याधरः—

विपत्तिकालानलजालमावृताः
समीहितं नैव कदापि कुर्वते ।
गभीरनीरं च विहाय तीरं
व्रजन्ति मत्स्या बडिशाशनोत्काः ॥ ३५ ॥

नारदः—

धन्या भारतभूरियं भुवितले दुग्धं शिशून्पाययन्
रुग्णानाशु चिकित्सया च दयया संसेवमानः सदा ।
लक्षाणामिह चैकदैव विदधे सर्वं प्रबन्धादिकं
भोज्यावाससमर्थनं वितरणे सन्नद्ध एष व्रती ॥ ३६ ॥

इन्दिरागान्धिः—(सोत्साहम्)

कदर्थिता जनाश्चेमे साम्प्रतं भयविह्वलाः ।
स्वगृहाणि गमिष्यन्ति शीघ्रमेव न संशयः ॥ ३७ ॥

भारतसुरक्षामन्त्री—

याह्याखान् विदधाति भारतसमं युद्धस्य संयोजनां
वैफल्यं ह्यवलोक्य सङ्गरभुवि प्राज्ञ्यामितो दर्पितः ।

चीनश्चामेरिका च सज्जितभटैः किं भारतं जेष्यति
किं वा लोपमुपेष्यति क्षितितले गर्वोन्नतो रावणः ॥ ३८ ॥

प्रधानामात्यः—अलमलं विषादेन! स्वस्था भवन्तु भवन्तः। विभिन्नराजनयिकानां विघटनेन नाधुना बङ्गलादेशस्थितिः पूर्ववल्लक्ष्यते। यतः-

नूतनस्यास्य राष्ट्रस्य रक्षाकृते साम्प्रतं मुक्तिसेना जवेनोत्थिता।
भर्जिताश्चाधुना पाकसेनाभटा नाशमेष्यत्ययं दुर्मुखो रक्तपः ॥ ३९ ॥

अपि च-

मुक्तिसेना श्रिता वानरीयं रणं शत्रुसंघं विदार्याधुना दारुणा।
नृत्यतीवात्र युद्धाङ्गणे पामराञ्जेष्यति स्राग् मुजीबस्य कामं प्रिया ॥ ४० ॥

इन्द्रः—जयतु जयतु मुजीबः। (साश्चर्यम्) मनुरिव मानवाधिकारनिदर्शको मुजीबः साम्प्रतं क्व वर्तते?

प्रधानामात्यः—न ज्ञायते रिपुबलैरधुना स नेता
क्व स्थापितोऽत्र भुवने करुणावतारः।
हाहा! जनेऽतिसरले विहिताभियोग-
मालोक्य विश्वजनता चकिता बभूव ॥ ४१ ॥

नारदः—(इन्द्रं प्रति) त्रिदशेन्द्र! त्वर्यतां त्वर्यतां स्वर्गमनाय। विदीर्यते इव मे हृदयं समाचारमिमं श्रुत्वा।

(नारदेन्द्रविद्याधरा वायुयानारोहणं कुर्वन्ति।)

नारदः—(सहर्षं भूमौ पुष्पवृष्टिं कुर्वन्नाशीर्वचनानि वितरति।)

अन्धकारावृता यामिनी यास्यति
प्राचि नूनं प्रकाशोद्गमो निश्चितम्।

स्वप्नभङ्गो ह्यपङ्गश्च यः साम्प्रतं
पूर्ववङ्गः स्वतन्त्रश्च बोभूयते ॥ ४२ ॥

भूयादत्र सदा सतां मतिमतां सत्कर्मबोधोदयः
विज्ञानामृतमत्र वै विहरतां संश्रेयसे जायताम् ।
राष्ट्राण्याधिविवर्जितानि सुहृदः सन्मार्गसम्प्रेषकाः
प्राधान्येन महीतले विलसतु द्राग्विश्वशान्तिः स्थिरा ॥ ४३ ॥

इन्द्रः—तथास्तु ।

(इति निष्क्रान्ताः सर्वे ।)

एडकः (श्रीएकनाथीय भारुड-गीतानि)

अनु० वि. के. छत्रे

[वेगात्स्मरस्य दुर्वाराद्धता उग्रतपस्विनः ।
प्रभुध्यानप्रभावेण शुकेन स तु निर्जितः ॥]

एडको मारः, शार्दूल एव दुर्वारः ॥ ध्रु ॥

अनेनाहतो गिरिजाकान्तः[1], ब्रह्मात्युग्रां[2] निन्दां नीतः ।
भापित एतेनाप्यमरेन्द्रः[3], तथैव स चन्द्रः[4] ॥ १ ॥

तेन नारदे[5] कृत आघातः, निष्पिष्टः सकुलं च दशास्यः[6] ।
गदया दूर्योधनश्चाहतः[7], कृतो निष्प्राणः ॥ २ ॥

निहतो भस्मासुरः[8] प्रमत्तः, वाली[9] तादृग्गतिं प्रापितः ।
विश्वामित्रस्तेनाभिहतः[10], तपस्वि-श्रेष्ठः ॥ ३ ॥

एष एडकः परमेकेन, निगृह्य परमात्मध्यानेन ।
एक-जनार्दन-पदे शुकेन, निबद्धो दीनः ॥ ४ ॥

---

१. मोहिनीम् अनुधावन्
२. दुहितरम् कामयमानः अनुधावन्
३. अहल्यां कपटवेषेण भुञ्जानः
४. गुरुपत्नीम् अपहृत्य भुञ्जानः
५. नारदीं कामयमाने
६. सीताम् अपहृत्य कामयमानः
७. द्रौपदीं सभायां विवस्त्रां कर्तुं प्रयतमानः
८. पार्वतीं कामयमानः
९. अनुजपत्नीम् अपहृत्य भुञ्जानः
१०. मेनका-वशंगतः

संसारः - विभक्तेन भाव्यम् ।

[विवाहोत्तरं प्रथमं पितृगृहं गता नवोढा, तां द्रष्टुम् आगतस्य पत्युः अग्रे रहः प्रायः सनिर्बन्धं वदति । 'यावत् स्वप्रपञ्चः पृथक् न आरच्यते तावन्नैव निवर्तिष्ये ।' सा इदं गीतं पठित्वा मोदेत पुरस्कुर्याच्च स्वनिर्बन्धसमर्थनाय ।]

विभक्तेन भाव्यं, बान्धवाः! विभक्तेन भाव्यम् ।
द्रष्टव्यं संसार-कौतुकं, ततश्च नवनव्यम् ॥ ध्रु ॥
संसारेण श्रान्तात्यन्तं, विक्रीय पैतिं[1] क्रीतं सस्यम् ॥ १ ॥
संसारेण श्रान्तात्यन्तं, श्वश्रू[2]-श्वशुर[3]-युगं विक्रीतम् ॥ २ ॥
मातृभगिन्या[4] सुखेन भुक्तं, मूढत्वं मे किमतः प्रथितम् ॥ ३ ॥
संसारेण श्रान्तात्यन्तं, विक्रीतं च ननान्दृचतुष्कम्[5] ॥ ४ ॥
एक-जनार्दन-कृतसंसारात्, कामः सक्रोधो मे निरगात् ॥ ५ ॥

---

१. देहभावः   २. ममता   ३. अहङ्कारः
४. समाधिः-भगवतः ध्याने नामस्मरणे च तल्लीनता
(मराठीभाषायां स्त्रीलिङ्गम्)
५. परा-पश्यन्ती-मध्यमा-वैखरी (वाचः)

निरग्रनासिका (अङ्गना)

[निरग्रनासिका योषा बहु यद्यपि भूषिता ।
ज्ञातुः प्रीत्यै न, देवस्य भक्तिर्दम्भान्विता तथा ॥]

कृतकनासिकाग्रधृग् यथाऽज्ञमोहनाऽङ्गना ।
तथाऽर्थलुब्धभक्तिरमलभावधारणं[१] विना ॥ १ ॥

निरग्रनासिकोपहासमेति योषिता यथा ।
सदम्भभक्तिरप्यभिज्ञतत्त्वविद्दृशस्तथा ॥ २ ॥

दधत्यपि स्रजं कचेषु कुम्कुमं च कज्जलम् ।
विरूपविग्रहाङ्गना सुरूपतामियात् कथम् ॥ ३ ॥

धनेन बाह्यसाधुता समर्थ्यते जनैर्भृशम् ।
सदम्भभक्तिवीक्षणेन लज्जते प्रभुः स्वयम् ॥ ४ ॥

जनार्दनस्य एक आह 'भक्तिहीननीरसम् ।
उपासनं विभोर्निरग्र-नासिकात्व-संनिभम् ॥ ५ ॥

---

१. संपदं (अपरः पाठः)

देव्याः प्रियबलिः (रोडगा)

प्रसीद मातः! प्रसीद मातर्! भवानि मयि सत्वरम् ।
प्रसीद मयि सत्वरं, भवानि! ते बलिं प्रदद्यां प्रियम् ॥ ध्रु० ॥
श्वशुरो ग्रामान्तरं गतो मे, मारय तत्रैव तम् ॥ १ ॥
श्वश्रूः पीडाकरी भृशं मे, जहि ताम् अयि! सत्वरम् ॥ २ ॥
वाचा ताडयते मां याता, विधवां कुरु तां द्रुतम् ॥ ३ ॥
क्रन्दति शिशुहतको ननान्दुर्, दद्रुरुगभ्येतु तम् ॥ ४ ॥
निहत्य पतिमाहुतिं प्रदद्यां, मोचय मां सत्वरम् ॥ ५ ॥
एक - जनार्दनं सर्वमपेतु, [1]एकैवासान्यहम् ॥ ६ ॥

परमार्थपरः गूढार्थः विशदीकृतः

अकुलीनस्त्रिया देव्याः अग्रे विहिता इयं प्रार्थना भयकरी अपि विनोदयति श्रोतृ-वाचक-मनः क्षणम् । परं तस्याः परमार्थपरं गूढार्थम् अभिज्ञाय, अर्थगाम्भीर्येण मनः प्रसादम् अधिगच्छति । सः गूढार्थ एवम्—

प्रार्थयमाना स्त्री जीवात्मबुद्धिः भवानीं चिच्छक्तिं प्रार्थयते । चिच्छक्तिः नाम मूलमाया । श्वशुरः-अहङ्कारः ; श्वश्रूः-कल्पना । इदं युग्मं निःशेषं नाशयितव्यं साधकेन । याता-इच्छा ; तस्याः धवः-द्वेषः (इच्छाद्वेष-समुत्थेन द्वंद्वमोहेन भारत । गीता-७-२७) । एतदपि युग्मं मनसः निःसारयितव्यम् अपुनःप्रवेशाय । ननान्दा-चिन्ता, तस्याः शिशुः-दुःखम् । ननान्दुः पतिः-विषयतादात्म्यम् । जीवात्मबुद्धेः पतिः अविवेकः ।

१. आत्मरतासान्यहम् इति भावः ।

आदिमायायै-

आवाहनं-प्रार्थनापूर्वकं, दुष्टसंहाराय प्रकटयितुम्

१

अपावृणु द्वारं, दुर्वशे! अपावृणु द्वारम् ।
दैत्यध्वंसं नेच्छसि चेद्, वस दृढबद्धद्वारम् ॥ ध्रु ॥

निराकार-निर्गुणे! नमस्ते, जगन्मूल! अम्बिके! ।
त्वमादिमाया साकारत्वं प्राप्तोग्रं चण्डिके! ॥

दशावतारान् स्वीकृत्य त्वं, हत्वा दुष्कृत्कुलम् ।
क्षीरसागरे शेषमञ्चके शेषे शान्ता भृशम् ॥

जयविजयौ तिष्ठतो रक्षकौ, दण्डधरौ द्वारे ।
भक्तोत्तममन्तरा प्रवेश्यो, न कोऽपि तेऽन्तःपुरे ॥

२

हिरण्यकशिपुर्दैत्यकुलभवः क्लेशयतेऽत्यन्तम् ।
भक्तोत्तममिति न मृष्यमाणा रूपमधा उग्रम् ॥

स्तम्भं भित्त्वा क्रोधावेगाद् नृसिंहरूपा त्वम् ।
दैत्यं हत्वा व्यधाः स्वभक्त-प्रह्लाद-त्राणम् ॥

३

सीताधर्षकखलो दण्डितस्त्वया सपरिवारः ।
विहितः कपिबलयुतया रौद्रो लङ्कायां समरः ॥

कुरुक्षेत्रभुवि कौरव-पाण्डव-रणोग्रकल्लोले ।
निहता दुष्टास्त्वया ह्यगणिताः साधुषु सुदयालो ॥

४

पुण्डलीकभक्त्या प्रसन्ना त्वमिष्टिकायां चिरम् ।
बौद्धरूपमादाय तिष्ठसि समपदमतिसुन्दरम् ॥

आषाढी, कार्तिकी गर्जत 'उदो! उदो!'-शब्दैः ।
याचे लक्षावधिभजकानां तव नामोद्घोषैः ॥

कामक्रोधाधिकारिवृन्दं रुन्धद् भक्तिपथम् ।
उदो-उदो-उद्घोषैर्भीतं पलायितं सजवम् ॥

५

प्रथमे चरणे कलेर्देवतास्तिष्ठन्त्यन्तर्हिताः ।
तीर्थैर्महिमा त्यक्तो वर्णाः सर्वे संमिलिताः ॥

गतमहिमानो देवा, भक्ता म्लेच्छैरत्यर्दिताः ।
तपोजपाद्या मोक्षोपाया निष्फलतां हा! गताः ॥

६

कामो महिषासुरः करोति विषयतुमुलमुग्रम् ।
आशामुरजो नदति दीपितं चाज्ञानस्योल्मुकम् ॥

क्रोधो वेतालस्तु दारुणो नितरामुन्मत्तः ।
भक्तिविरक्ती हन्त! निहतवान् मदमत्सरपुष्टः ॥

पुण्डलीकस्य निःसीमभक्त्या तुष्टः भगवान् तत्पुरतः आविर्बभूव । वृद्धपितृ-
वामग्नः भक्तः पितृशुश्रूषान्तरायः मा भूदिति समीपस्थाम इष्टिकाम् आसनार्थे
गवतः अग्रे असारयत्, पितृसेवासमाप्तिपर्यन्तं च तत्र स्थातुं प्रार्थयामास ।
क्तवशंवदः भगवान् भक्तिमाहात्म्यप्रख्यापनाय तस्याम् इष्टिकायां अष्टाविंशति-
गानि (प्रचलितार्तिक्यानुसारेण) तिष्ठति इति कथा पण्डरपुरीया ।

७

अहङ्कार-'मुञ्जो'ऽर्देति, बलवान् दम्भो 'झोटिङ्गः' ।
नृत्यत आशातृष्णे विषयैर्जनितः कल्लोलः ॥
विविध-वासना-बहुलकल्पना-भूतानि स्वैरम् ।
भोगदीपिका धृत्वा विदधति विषयोर्मिषु नृत्यम् ॥

८

दुर्दर्शेयं जनस्थितिरिति, बद्धं किं मौनम् ।
स्थिता निष्क्रिया समचरणैवं स्वस्था, ब्रूहि त्वम् ॥
पुण्डलीकभक्तेर्विमोहात् किमसि त्वं तूष्णीम् ।
एक-जनार्दन इत्यनुयुङ्क्ते शरणस्त्वेदानीम् ॥

९

आदिममाये[1] नमो भगवति! महालक्ष्मि! तुभ्यम्! ।
अनादिसिद्धे मूलप्रकृते! अपावृणु द्वारम् ॥
शिव-विष्णु-ध्यानेऽसि रवीन्दु-द्योतित-कर्णौ ते! ।
सीमन्तरेखायां तारा-मुक्ताः शोभन्ते ॥
नवखण्डा भूश्चोली पादौ भिन्तः पातालम् ।
दीपयन्ति मुकुटं स्वर्लोका, अपावृणु द्वारम् ॥

म्लेच्छैरुच्छिन्नं पैठणस्थं स्वकुलदेवतायाः रेणुकाया मन्दिरं दृष्टं प्रायः प्रेरयामास श्रीनाथम् एतद्-गीतरचनायाम् ।

सर्वे साधवः मरणोत्तरमुक्तेः उपायम् उपदिशन्ति । ऐहिक-दास्योन्मुक्तिप्रयत्ने ते उदासीना इति आक्षिपन्ति बहवो विद्वांसः । श्रीरामदासस्वामी एकमात्रः साधुः इहामुत्रमुक्तेः उपायौ उपादिशत् इति ते स्वीकुर्वन्ति । श्रीएकनाथः ऐहिकदास्य-मुक्तौ न उदासीनः परं जागरूकः, प्रेरणादानेन च क्रियाशीलः आसीत् इति इदं गीतं प्रत्याययति । तेन स्वरचिते भावार्थरामायणेऽपि कथाप्रसङ्गेन भूयः प्रेरिताः जनाः दास्यम् उच्छेत्तुम् उत्थातुम् । (श्लेषार्थेन) ।

१. शरणः त्वा इदानीम् ।

तुकारामस्य अभङ्गवाणी

गोविन्दः टेकाले

बालक्रीडा

१. देव आदिदेव जगत्त्रयस्य जीव ।
शृणोषि केशव मम विज्ञप्तिः ॥ १ ॥

मम वाणी तव गुणनाम वर्णयति ।
एतादृशं प्रेम यच्छ काश्चित् कलाश्च ॥ २ ॥

कला तव अस्माकं जीवनम् ।
उचितं कृत्वा यच्छ अस्मभ्यम् ॥ ३ ॥

अस्माकं शरणागतानां तवैव आधारः ।
त्वं तु सागरः कृपासिन्धुः ॥ ४ ॥

सिन्धुः सुमार्गः भवति तव नाम्ना ।
दहन्ति कर्माणि दुस्तराणि तानि ॥ ५ ॥

तत् फलम् उत्तमं तव निजध्यानम् ।
नास्ति गर्भवासः सेवित्वा ॥ ६ ॥

सेवित्वा रामकृष्णं नारायणम् ।
नास्ति तस्य बन्धनं संसारस्य ॥ ७ ॥

संसारस्तु अस्ति तृणमयः ।
अग्निः तं खादति क्षणमात्रे ॥ ८ ॥

क्षणमात्रे दहति दोषाणां राशिम् ।
निन्द्यान् उत्तमान वन्द्यांश्च करोति ॥ ९ ॥

करोति व्रतं सत्यं स्वयमेव ।
पतितपावनो दीननाथः ॥ १० ॥

नाथः अनाथानां पतिः गोपिकानाम् ।
पूरयति चित्तस्य मनोरथम् ॥ ११ ॥

चित्ते यद् धारयति तुका उवाच दासः ।
सफलं करोति मनोरथम् ॥ १२ ॥

२. मनोरथो यथा गोकुलस्य जनानाम् ।
पूरयितव्या वासना तथैव ॥ १ ॥

ऋणं दातुम् अवतारो गृहीतः ।
अविनाश आगतो आकारं प्रति ॥ २ ॥

श्रान्ते अभवतां वसुदेवदेवक्यौ ।
हता बालकाः कंसेन दुराचारेण ॥ ३ ॥

दुराचारस्य नास्ति भूतदया ।
आत्मपरभावः तस्य पापपुण्ये ॥ ४ ॥

पुण्यकालस्तस्याधुनाऽगतः ।
देवक्या गर्भेण देव आगतः ॥ ५ ॥

गर्भेण तस्या आगतो नारायणः ।
नष्टाणि बन्धनानि स्वयमेव ॥ ६ ॥

स्वयमेव नष्टा बन्धनशृङ्खलाः ।
बन्धनस्य अर्गला च ॥ ७ ॥

बन्धनं कृतं बहुदिवसेभ्यः ।
मुक्तम् अचिरादेव ॥ ८ ॥

न ज्ञातः स तेन कथयित्वा भावः ।
अस्माकं स्थानं नन्दगृहे ॥ ९ ॥

नन्दगृहं गत्वा आगम्य वसुदेवेन सह ।
नाभवद् बाधा देवेन सह ॥ १० ॥

देवसहितस्य तस्य नास्ति काऽपि बाधा ।
तुका उवाच नास्ति भयचिन्ता ॥ ११ ॥

अधःपतनम्

चतुर्भुज ल० पूजारा

गहनतिमिरव्याप्तं व्योमास्थिरं जलधेस्तलं
प्रवहति महानप्संघातः प्रकम्पनवेगतः ।
प्रचलति तरी तस्मिन्काचिज्जले जनवाहिनी
विगलितभया भोगासक्ता नराश्च तदाश्रिताः ॥ १ ॥

चलिततरणेः पृष्ठप्रान्ते नरो विहरंस्तदा
पतति सहसा पारावारे—न नौस्तु विलम्बते ।
नियतपथगा त्यक्त्वा पश्चात्प्रयात्यवमत्य सा
द्रुतमकरुणं तस्याधस्तात्पयांसि सरन्ति हा ॥ २ ॥

दिशि दिशि महोल्लोला गर्जन्त्यतीव भयंकराः
त्वरितगतयः सोत्साहास्तेऽदयं प्रहरन्ति तम् ।
शिरसि पयसः पातोत्पाताद्भृशं नर आहतः
सुफलवदसौ कन्दौ क्षिप्तोऽशनाय विवर्त्यते ॥ ३ ॥

व्यहरदवशः सोऽन्यैः सार्धं पुरा पृथुनावि वै
चिरमनुभवन्पानालापांस्तरीस्थितयात्रिकैः ।
सुरभिपवनैर्भानोरिन्दोः करैश्च निषेवितो
जगति जनतासामान्यं सोऽकरोदसुधारणम् ॥ ४ ॥

अपतदधुना- पर्याप्तं तत्- स दैवहतो जले
क्षितिजनिकटं संसर्पन्ती तरी न तु दृश्यते ।
वियति विहगा देवाभास्तां व्यथामपि चक्षते
न कथमपि ते तत्साहाय्यप्रदानहिता जले ॥ ५ ॥

अवनतखगा उड्डीयन्ते जनस्त्विह वेपते
जलधिनभसोर्मध्ये दीनः प्रसह्य निपीड्यते ।
पितृवनसमः तस्याधस्ताद् भयानकवारिधिः
पृथु च गगनं तन्मूर्ध्न्यास्ते शवाम्बरसंनिभम् ॥ ६ ॥

तलमवतरन्नम्भोधेर्ना वृथेरयते करौ
प्रददति भयं छायादैत्या जले विधिनिर्मिताः ।
रुतमिव वने यातो नादो 'विभो क नु वर्तसे'
बधिरजलधिस्तत्साहाय्यप्रलापमुपेक्षते ॥ ७ ॥

अदमितगतिस्तेऽस्ति क्रूरा मनुष्यसमाज हे !
रुधिररसितः पन्थास्तेऽयं सदा खलु वर्तते ।
दिशति जगति त्वन्नैर्घृण्यं महन्ननु तेऽशुभं
निधनसमयो नीतेः प्राप्तोऽधुना किममङ्गलः ॥ ८ ॥

---

* Free translation from the chapter "A Man Overboard" in *Les Miserables.*

मधुसञ्चयः

(विविधसूक्तिप्रकरानुवादः)

शै. सि. पाठकः

शान्तेः प्रेम्णो भद्रतायाः प्रभावः सुखदायकः ।
सहस्रगुणमुत्कृष्टा शक्तिर्हिंसाविरोधिनाम् ॥ —बुद्धः

दरिद्रान्तर्वासिनं तं प्रभुं हित्वा कमाश्रये ? —गान्धी

जनतासेवया मूकं पूजयाम्यहमीश्वरम् ।
परेशं सत्यरूपं च सत्यं चेश्वरविग्रहम् ॥ —गान्धी

ईश्वरार्पितमेवैतद् यत् किञ्चित् क्रियते मया ।
स्वार्थबुद्ध्या कृतं कर्म बन्धनं सुखदुःखयोः ॥
—तिलकः (गीतार्थः)

भिक्षया प्राप्यते नैव स्वातन्त्र्यं स्वबलाद्धि तत् ॥ —तिलकः

विनाश्य मानवं मूल्यं क्रौर्यमङ्गीकृतं यदा ।
तदा प्रत्नसमाजानामन्तं दृष्टं महीतले ॥ —रवीन्द्रः

उपास्व सङ्गीतकलां भावनाधर्ममुन्नय । —राधाकृष्णन्

दयापात्रतया श्रेयानीर्ष्यापात्रं नरो भुवि ॥ —हेरोडोटस्

वीरः सकृन्मृतिं गच्छत्यसकृद् हीनपौरुषः । —षेक्स्पियर्

विश्वेषु राष्ट्रकविषु यच्छ्रेष्ठं तद्धि शाश्वतम् । —लाङ्फेलो

महान् कविर्नास्तिकोऽपि यो न दार्शनिको महान् । —कॉलरिज्

मूर्खताप्रभवः क्रोधः पश्चात्तापे निमज्जति । —पिथागोरस्

चिरानन्दझरं तद्धि यत् सौन्दर्ययुतं सदा । —कीट्स्

गम्भीरचिन्तनफला चारित्र्ये ऋजुता मता । —हेस्लिट्

ऋग्वेदसंहिता सायणभाष्योपेता

प्रथमो भागः, प्रथममण्डलम् । वैदिकसंशोधनमण्डलम् । पुण्यपत्तनम् - ९ । १९७२ ।

१९३३ - वर्षे नूतनतया मातृकाः संशोध्य सायणभाष्येण सह ऋग्वेदः सर्वः वै. स. मण्डलेन प्रकाशितः । स चिराद्दुर्लभो जातः, पुनश्च मण्डलाधिकृतानां व्यवसायेन केन्द्रीय - प्रान्तीय - शासकानां धनसाहाय्येन मुद्रितः पाठकानां विमर्शकानां च सर्वेषां प्रमोदाय भवति ॥ (वे. रा.)

कृष्णयजुर्वेदीया तैत्तिरीय-संहिता

भट्टभास्कर-सायणभाष्यसमेता । वैदिकसंशोधनमण्डलम्, पुण्यपत्तनम् । प्रथमद्वितीयभागौ १९७०, १९७२ । रू. ४०, ४५ ॥

उपरि निर्दिष्टमिदं संस्करणं तै.संहिताया बह्वीनां मातृकाणां संशोधनेन निर्वर्त्तितम् । भाष्ये द्वे अपि सह वा पृथग् वा दुर्लभे सञ्जाते । तयोरेकस्मिन् संपुटे प्रदानमत्र सौकर्याय भवति । भाष्यद्वये अपि यान्युदाहरणवाक्यानि तेषां सर्वेषामाकरा विमृग्य प्रदत्ता अत्र ।

भागद्वये संहितायाः प्रथमकाण्डः ८-प्रपाठकान्त एव प्रसृतः । उपरितनभागाः शीघ्रमेव मुद्रणं प्रकाशनं चैष्यन्तीति विश्वसिमः ॥ (वे. रा.)

माध्यंदिनसंहितायाः पदपाठः

(त्रिविधावान्तरपाठैः समन्वितः) । सम्पादकः—युधिष्ठिरमीमांसकः । रामलालकपूरट्रस्ट, सोनीपत, हरयाणा । १९७१ ।

वेदसंहितायाः पाठो भेदहीन एकरूप एवोपागतः । पदपाठे तु न तथा । प्रधानात्पाठात्क्वचिद्भिन्नोऽपि स्वरादिषु पाठस्समुपलभ्यत एव । सम्पादकैरेष भेदो विचारितः वाजसनेय-माध्यन्दिनशाखायाः, उपलब्धाश्च भेदा अस्मिन् पुस्तके मुद्रिताः । उच्चारणं लेखनप्रकारं च स्पृशन्तीमे भेदाः, तथा स्वरं, यकारषकारौ, जकार-खकारौ, समासमवग्रहमुपसर्गं प्रगृह्यं, ह्रस्व-दीर्घे च; एवंरूपेष्वंशेषु प्रसृतोऽयं भेदः चतुर्विधं पाठस्रोतः प्रदर्शयति ।

भूमिकायां विस्तरेणैते भेदा विचारिताः । ततो बाहुल्येन संप्रदायागतः पदपाठः, तदधस्ताद्भेदाश्च मुद्रिताः । शोधकार्यमेतत् हस्तलिखितानां मुद्रितानां च ग्रन्थानां परिशीलनेन साधितम् शोधकार्ये निरन्तरं व्यवसायभृतां संपादकाना-मकुण्ठितं प्रयासं कृतहस्ततां च व्यञ्जयति ॥ (वे. रा.)

शुक्लयजुर्वेद-माध्यन्दिन-संहिता तृतीयाध्याय-समन्वय-भाष्यम्

स्वामिगङ्गेश्वरानन्दैः विरचितम् । गुरुगङ्गेश्वर-चारिटबल्-ट्रस्ट्, गङ्गेश्वर-धाम, १३, पार्क् एरिया, करोल्बाग्, नवदेहली-५ ।

उपर्युक्तेऽध्याये ये मन्त्राः, ते सर्वे कर्मकाण्डपरतया देवयजनोपयोगितया निर्दिष्टाः । वेददर्शनाचार्याः गङ्गेश्वरानन्दा इह स्वव्याख्यायां समन्वयनाम्न्यां मन्त्राणाममीषां देवयाजिविषयतया तथा आत्मयाजिविषयतया च, तथैव भक्तविषयतया च व्याख्यां प्रददति । वेदशास्त्रप्रमाणपुरस्सरमेव विना क्लेशं अध्यात्म-अधिभक्ति उन्नयनं क्रियते । एवं च कर्मज्ञानभक्तिमार्गास्त्रयोऽपि सङ्गृहीता भवन्त्यत्र । स्वामिनां सर्वतोमुखं पाण्डित्यमत्र समुद्योतते ॥ (वे. रा.)

सामसारसर्वस्वम्

संपादकः मायूरं रामनाथदीक्षितः । भीमण्णमुदलि स्ट्रीट्, मद्रास्-४ । १९७२ । रू. ८ ॥

कौथुमिसामगेषु विश्रुतस्य संपादकस्यास्य गानेन प्रवचनेन च भारते तत्र तत्र मण्डितानि बहूनि वेदशाखासंमेलनानि । सलक्षणच्छन्दोगविद्वत्सु अग्रगण्योऽयं बहुभ्यो वर्षेभ्यः पूर्वं द्रमिडभाषया सामवेदं, तत्संहितास्वरूपं, तद्गागान्, गानभेदान्, ब्राह्मणग्रन्थान्, लक्षणग्रन्थान् अन्यांश्च सर्वान् विषयान् क्रोडीकृत्य ग्रन्थमेकं प्राकाशयत् । बहुविषयप्रतिपादकस्य तस्य ग्रन्थस्य भाषाप्रयुक्तप्रचारसंकुचितताम पाकर्तुं तद्गतः सर्वो विषयोऽत्र साम-सारसर्वस्वाख्ये ग्रन्थे संस्कृतभाषया तेनैव प्रतिपादितः । अस्य उपयोग-मितोऽपि बहूकर्तुमाङ्ग्ल-हिन्दीभाषाद्वारेणापि अत्र सारः प्रदत्तः । केन्द्रीय-संस्कृतपरिषदुपकारेण मुद्रितमिदं पुस्तकम् डा. वे. राघवार्याणा-मुपोद्घातेन शोभतेतराम् ॥

गुरुकुलपत्रिका-वेदयोगाङ्कः

मार्च्-एप्रल् १९७३ । गुरुकुलविश्वविद्यालयः, कांगडी, हरिद्वार ॥

य एष प्रसिद्धः पातञ्जलो योगः, तस्य वैदिकं बीजं, वेदेषु च कीदृशोऽस्या विद्याया व्यवहारः, वेदेषु बहुत्र दृश्यमानस्य योगशब्दस्य अर्थाः, वैदिकयोगसिद्धिः, कर्मकाण्डस्य योगस्य च सम्बन्धः, वेदेषु योगसाधनानि इत्याद्या विषया अस्मिन् विशिष्टायां सञ्चिकायां बहुषु निबन्धेषु तैस्तैर्विद्वद्भिमर्शकैर्विचारिताः । योगविद्येतिहासपारंपर्ये बहून् विषयान् उपस्थापयन्त्येते निबन्धाः ॥ (वे. रा.)

सविता - सुपर्णाङ्कः

मार्च् १९७३ । वेदसंस्थानम् , बाबू मोहल्ला, ब्यावर् रोड्, अजमेर् ।

वेदेषु सुपर्ण इति, यश्च पश्चाद्गरुड इति श्रुतः, तस्य दैवतस्य वेदेषु, तत्समनन्तरकालभाविनि साहित्यशिल्पादिषु यादृशं स्वरूपं तद्विषयिक्यो यादृश्यो भावनाः, तदेतत्सर्वमत्र बहुभिर्लेखकैः लघुभिः, विस्तृतैश्च सन्दर्भैः हिन्दीमयैर्व्याख्यातम् । 'सुपर्ण - सन्दर्भ - विचार' इति यो विपुलो निबन्धोऽत्र अभयदेवेन बदरीप्रसादेन च दत्तः, स संपुटस्यास्य मुख्यो भागः, यत्र वैदिकसाहित्ये सुपर्णविषयका १४६ मन्त्रा विवृताः ॥ (वे. रा.)

वेदमन्दिरसमारोहः

श्रीगङ्गेश्वरधाम, नवदेहली ।

इदमभिनन्दनग्रन्थलक्षणं बिभ्रत् पुस्तकम् ; अत्र वेदविषयका निबन्धाः आङ्ग्ल-संस्कृतभाषाभ्यां लिखिताः । वेदपरिपालनप्रचारार्थं श्रीगङ्गेश्वरानन्दस्वामिभिः यन्महत्कैङ्कर्यं क्रियते, तदत्र प्रतिफलितं दृश्यते ॥ (वे. रा.)

वैदिक साहित्य एवं संस्कृति (भृगुऋषीणां चरित्रं कार्यं चानुसृत्य)

लेखिका-डॉ. निर्मला भार्गव । देवनागर प्रकाशन, जयपुरम् । १९७२. रू० ३० आग्राविश्वविद्यालयेन पीएच्. डी. उपाध्यर्थे स्वीकृतः शोधप्रबन्धोऽयम् । स्वतंत्रतारजतजयन्ती वर्षे, १९७२ खिस्ताब्दे पुस्तकरुपेण प्रकाशितः ।

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति न्यायेनास्य निबन्धस्य विषयः वैदिकं वैदिकोत्तरम् च साहित्यमितिहासपुराणं चाश्रित्य प्रथितोऽस्ति। महाभारते भृगुवंशोत्पन्नानां चरितं तत्र तत्रोल्लिखितमस्ति। पुराणेषूपलभ्यमानान् भृगुचरित्रकथांशानादाय वर्णनमत्र पूरितं दृश्यते । नवाध्याययुक्तेऽस्मिन् प्रबन्धे भृगुऋषीणां चरित्रं राष्ट्रभाषायां सामान्यजनानामपि मनोरञ्जकत्वेन प्रतिपादितम । प्रबन्धोऽयम् लेखिकायाः दीर्घं प्रयासं विद्वत्तां च सम्यग्दर्शयति ।। (सू. कु. द्वा.)

वैदिकसाहित्यम्

(A History of Vedic Literature). एस्. एन्. शर्मा । चौखाम्बा संस्कृतसीरीस्, वाराणसी-१ । १९७३ । रू. १२.

बहुभिर्बहुधा चिरात्कृतमेवेदं कार्यं वेदानां तदङ्गानां च स्वरूपचरित्रादि-वर्णनरूपम् । तथापि परिचितानेव विषयान् प्रसिद्धेभ्यः प्रकाशितेभ्यो ग्रन्थेभ्यः संकलय्य पुनश्च प्रददातीतं पुस्तकम् । मुद्रणदोषा बहवो वर्तन्ते ॥

वाल्मीकिरामायणम्

वि. सीतारामय्य, बेङ्गलूर् । साहित्य अकादमी, नवदेहली । १९७२ । रू. ८ ॥

कन्नडे, संस्कृते, आङ्ग्लभाषायां च प्रसिद्धो विद्वान्, लेखकश्च श्री वि. सीतारामार्यः बहूनां ग्रन्थानां प्रणेता, साहित्ये च रासिक्यसंपन्नो विमर्शकश्चेति सुविदितमेव साहित्यविदाम् ।

साहित्य-अकादमी-परिषदा प्रकाश्यमानायां भारतीय-साहित्य-निमातृ-ग्रन्थमालायामन्तर्भूतोऽयं ग्रन्थः, आदिकवित्वेन प्रख्यातं महर्षिं वाल्मीकिं तत्प्रणीतं मूलसंस्कृतरामायणं च विषयीकरोति ।

रामो रामायणं च भक्तिप्रस्थाननयेन नीतं व्याख्यातं च, तथैव जनमनस्सु च निरूढं विराजते । तथापि मानुषकथारूपेण मानुष्यकैः भावैः परिपूर्णं काव्यमित्येवेदमादिकाव्यमत्र ग्रन्थकृता परिशीलितं, यतस्तस्या-भिप्रायेण एवंरीत्यैव रामायणस्याद्यत्वस्य च सम्बन्धो भवितुमर्हतीति ।

उदात्त-न्यायानपेत-नरोत्तमरूप-पात्रत्वेनैव रामस्य संप्रति अनुभूतिरुचिता; एवमेव पात्रान्तरविषये च। अतोऽस्मिन् ग्रन्थे न मतदृष्ट्या, न वा भक्ति-दृष्ट्या रामायणतत्पात्रविमर्शः प्रस्तुतः, अपि तु काव्यरसदृष्ट्यैव।

प्रथमं अनुस्यूतकथावर्णनम; अनन्तरं कौटुम्बिक-दाम्पत्य-भेदाः; ततः पात्राणि- दशरथः, रामादिभ्रातृचतुष्टयम्, सीता, हनूमान्, रावणः, अन्यानि पात्राणि च; ततः केचन विशिष्टाः कथासन्दर्भाः; अन्ते वाल्मीकेः कविता-प्राशस्त्यम् इति ग्रन्थस्य विषयाः।

दाम्पत्यभेदेषु मुख्यतया वर्गत्रयं विमृष्टं—अयोध्यागतमार्याणां मानवानाम्, किष्किन्धागतं वानराणाम्, लङ्कागतं राक्षसानां च। त्रिविध-सभ्यतासंस्कारपरिपाकानां निदर्शनभूतान्येतानि त्रीणि।

"श्लोकप्रवाहमाधुर्ये सन्दर्भौचितवैचित्र्यशोभि-संस्कृतभाषा-ध्वनिरसौभाग्ये च आदिकाव्यस्य महत्त्वं सर्वोत्कर्षेण राजते। पठतां शृण्वतां चैव अनितरसाधारणानुभूतिः ततो भवति, यस्य प्रतिनिधिर्नास्त्येव।" इति उपसंहरत्ययं विमर्शकवरेण्यः स्वीयं रामायणपरिशीलनम्॥ (वे. रा.)

गोपीगीतम्

श्री गङ्गेश्वरानन्दस्वामिनां तथा श्रीजगन्नाथशर्मणां च व्याख्याभ्यां सह सेठ् गोविन्ददास् सेडमल् आसवानी (मुम्बई ५२) इत्येतैः प्रकाशितम। रू. २.

पूज्यानां श्रीगङ्गेश्वरानन्दस्वामिनां परिचयः सञ्चिकायामस्यामन्यत्र दत्तः। श्रीमद्भागवते श्रीकृष्णविरहविषण्णानां यद् स्ववल्लभं कृष्णमधिकृत्य 'रुरुदुः सुस्वरं गोप्यः कृष्णदर्शनलालसाः' इति शुकाचार्यैः वर्णितं गोपिकागीतमिति-'जयति तेऽधिकं' इत्यारभ्य १९ पद्यात्मकं-दृश्यते, तस्य श्रीगङ्गेश्वरानन्दैः गभीर-वेद-वेदान्तार्थसमन्वयिनी व्याख्या कृता, तादृश्येव हिन्दीभाषया द्वितीया टीकापि कृता जगन्नाथशर्मभिः। भक्तिज्ञानमार्गप्रवणैरा-स्तिकैरवश्यानुसन्धेयोऽयं ग्रन्थः॥ (वे. रा.)

सांख्यकारिका

ईश्वरकृष्णकृता गौडपादव्याख्यया सहिता। डा० ति. ज. मैङ्करेण सम्पादिता। द्वितीयावृत्तिः १९७२। ओरियण्टल् बुक् एजन्सि, पूना। रू. १८

सुप्रसिद्धाः ईश्वरकृष्णकारिकाः, मुद्रिताश्चानूदिताश्च बहुशः । विश्वविद्यालयेषु पाठ्यप्रणाल्यां निवेशितस्यास्य ग्रन्थस्य सव्याख्यस्य सम्पादकेन आङ्ग्लानुवादो दत्तः, आङ्ग्लभाषया टिप्पण्यश्च दत्ताः । आङ्ग्लोपाद्घाते सांख्यशास्त्रविषयाः परामृष्टाः– सांख्यशब्दार्थः, सांख्यशास्त्रग्रन्थाः, कारिकाः, तद्व्याख्याः, सांख्याचार्याः, सांख्यं शास्त्रान्तराणि, बौद्धं च, सांख्यसिद्धान्तः, कारिकाकर्ता, तस्य कालिदासत्वप्रवादः, न्यूनाधिककारिका इत्यादयः ॥

(वे. रा.)

प्रमाणलक्षणम्

सर्वज्ञात्ममुनिकृतम् - ई. ईश्वरनम्पूतिरिणा संपादितम् । संकृतविभागः, केरलविश्वविद्यालयः, तिरुवनन्तपुरम् । १९७३. रू. ७-५०.

अद्वैतप्रस्थाने सर्वज्ञात्ममुनिः प्रख्यातः, तस्य संक्षेपशारीरकमपि प्रख्यात एव ग्रन्थः । तस्य द्वौ लघुग्रन्थौ 'पञ्चप्रक्रिया', 'प्रमाणलक्षणं' चेति । एतयोः प्रथमनिर्दिष्टः मद्रपुरीविश्वविद्यालयद्वारा डा. ति. रा. चिन्तामणिना पूर्वं प्रकाशितः । तेनैव द्वितीयोऽपि ग्रन्थः क्रमशः प्रकाशनाय Journal of Oriental Research पत्रिकायामुपक्रान्तः, भागशो मुद्रितश्च ।

अत्र ईश्वरनम्पूतिरिणा प्रमाणलक्षणस्य 'पूर्णं' मुद्रणं कृतम्; पूर्णशब्दस्य च 'यावदुपलब्धम्' इति परिष्कारो देयः; यतः उपलभ्यमानासु मातृकासु ग्रन्थोऽयं न पूर्णतयोपलभ्यते । अनेनैव कारणेन Journal of Oriental Research पत्रिकायामिदमुपक्रान्तमपि कार्यं मध्ये त्यक्तम् ।

इदं च प्रमाणलक्षणं मीमांसाशास्त्राभ्युयगतानि प्रमाणानि विषयीकरोति ।

आङ्ग्लोपोद्घाते संपादकेन ग्रन्थकर्तुः कालो विचारितः, अत्र प्रतिपादितः शास्त्रीयो विषयः संग्रहेण उपन्यस्तः ।

कालचर्चायां द्वौ मुख्यौ प्रश्नौ-सुरेश्वर-देवेश्वरयोरद्वैतं वा द्वैतं वा; मनुकुलादित्यो नाम राजा कः, कदा रराज इति । देवेश्वरो भिन्न एव; मनुकुलादित्यश्च ११-शतकीयो भास्कर-रविवर्मेति प्रसिद्ध इति चेति संपादकस्याभिप्रायः ॥

(वे. रा.)

गुरुपूर्णिमोपहारः

रामायणमुद्रणालयः, मद्रास्-४

व्यासपूजा या यतिभिरनुष्ठीयते, तस्याः प्रकारं प्रतिपादयत्ययं ग्रन्थः । विश्वेश्वरसरस्वतीविरचितयतिधर्मसंग्रहाधारेण संकलितमिदं पुस्तकम् । व्यासपूजायाः कालः, तदानीं पूजनीया देवता आचार्याश्च, पूजाक्रमः, शुद्धचैतन्यपूजा, तत्तदाचार्योचितस्तोत्राद्युदीरण - नमस्कारादि इत्येतत्सर्वमत्र प्रदत्तम् । अन्ते च श्रीशङ्करभगवत्पादस्तोत्राणि च दत्तानि ॥ (वे. रा.)

न्याय-वैशेषिकतन्त्रार्थसंग्रहः

पण्डितराज वे. सुब्रह्मण्यशास्त्रिभिः लिखितः, अद्वैतसभा, त्रिशिरःपुरी, १९७३ । रू. १.

सर्वेषां विदितचराः पण्डितराज-शास्त्ररत्नाकरादिबिरुदभूषिताः वे. सुब्रह्मण्यशास्त्रिणः । न्यायवैशेषिकतन्त्रेषु विशिष्य प्रावीण्यं प्राप्तैः शास्त्रिभिः न्यायवैशेषिकशास्त्रप्रविविक्षूणां परिज्ञानाय रचितोऽयं ग्रन्थः अक्षपादकणादप्रणीतप्रमेयाणि संग्रहेण निरूपयति । एतत्तन्त्रयोः तत्तद्विषयेषु मतविकल्पा अपि निरूपिताः । अद्वैतसभास्थापकपोलकाभिजन-सुन्दरेशशास्त्रिस्मारकतया प्रकशितः । कविकोकिलादिबिरुदांकितानां डा. वे. राघवार्याणाम् आमुखमपि न्यायाध्येतॄणां विद्यार्थिनां सोपानायते । तैः स्वीये आमुखे न्यायवैशेषिकसंबद्धा विषया विवेचिताः । श्रीकाञ्चीकामकोटिपीठाधिपतीनां श्रीजगद्गुरूणां श्रीमुखेन भूषितोऽयं ग्रन्थः विद्यार्थिनां कृते अतीव उपकारी भवति ॥ (कु. वे. शे.)

सिद्धान्तशेखरः

उभयवेदान्तिविश्वनाथकृतः । श्री. के. सीतारामसोमयाजिभिः सम्पादितः, प्रकाशितश्च । सम्पादकः-१०५१, देवपार्थिवरोड्, चामराजपुरम्, मैसूर्-४. १९७१. रू. ३०.

अयं शैवागमनिबन्धरूपो ग्रन्थः । कर्ता चास्य स्ववृत्तान्तं ग्रन्थे कथयति- नरसिंहकल्पसाराख्यस्य ग्रन्थस्य निबन्धुः नरसिंहस्य प्रप्रपौत्रः, वाराणसी-

वास्तव्य-भास्करपुत्रः विश्वनाथः १३ [शताब्द्यामासीत् इति आङ्ग्लोपाद्धात-लेखकैः डा० राघवार्यैः प्रदर्शितम् ।

संपादकैः प्रदर्शितप्रकारेण अयं निबन्धः १६-१७-शताब्दीयैः निबन्धकारैरुदाहृतः ।

ज्ञान-क्रिया-योग-चर्यारूपपादचतुष्टयप्रतिपाद्यमागमिकविषयजातं संकलय्यात्र विश्वनाथः नित्य - नैमित्तिक - काम्यरूपैः काण्डत्रयैः प्रतिपादयति । अत्र अवधेया अंशाः - वैदिक - आगमसंप्रदाययोः सामरस्यम् , शैवरीत्या तत्त्वाध्वादि - सृष्टि - प्रकार - प्रतिपादनम् , शिवाद्वैतस्य पार्यन्तिक-प्राप्यत्वेन वर्णनमित्यादि ।

संपादकेन १४ मातृकाः परिशील्य संपादितोऽयं ग्रन्थः । स्वभूमिकायामागमार्थानां विवरणमपि दत्तं संपादकेन । डा. वे. राघवार्यैरवधेया बहवोऽर्थाः स्वाङ्ग्लभूमिकायां निर्दिष्टाः । विशिष्य 'उभयवेदान्ति'-बिरुदस्य शैववैष्णवसाधारणो यो नूतनोऽर्थः, समीचीनश्च तैर्विशदीकृतः स अवधानार्हः उपादानार्हश्च भाति ।

केन्द्रीयसंस्कृतपरिषत्साह्येन मुद्रितमिदं पुस्तकम् ॥

भवभूतेर्महावीरचरितम्

आर्. आर्. अम्बरदेकरेण संपादितम् । अद्रीष् प्रकाशस्थानम् , मुम्बई ६९. रू. १५. ००.

भवभूतेर्महावीरचरितं नाम नाटकं प्रथमम् आनन्दराम बरुवेन (पुनर्मुद्रितं १९६९), अनन्तरं तोडरमल्लेन (१९२८ वर्षे) च सम्यक् संपादितम् । काव्यमालायां च प्रकाशितम् । सर्वाण्यप्येतानि मुद्रणानि संप्रति नोपलभ्यन्ते । अत एव अम्बरदेकरेण स्व-आङ्गलानुवाद-विवरणादिभिरायोज्य संपादितमेतत्प्रस्तुतं मुद्रणं श्लाघनीयम् । छात्राणामन्येषां चोपकारायैतत् भवेदित्यत्र न संशयः ॥ (सु. सु. जा)

भैरवानन्दनाटकम्

मणिककविप्रणीतम् । श्रीमन्नारायणद्विवेदिना संपादितम् । मोहिले-नगर्, इलहाबाद् ६ । रू. ४. ००.

मैथिलो मणिककविः नेपालीयनृपतिना जयस्थितिमल्लेन (१३१८-९४ ई) आदृतः। जयस्थितिमल्लस्याज्ञानुसारं लिखितं भैरवानन्दमेतत्. षडङ्कं नाटकं तत्पुत्रस्य धर्ममल्लस्य विवाहोत्सवे अभिनीतम। त्रिभुवनेषु विद्यमानानि पात्राण्यधिकृत्य प्रणीतेऽस्मिन् नाटके तान्त्रिकसाधनानि मुख्यतया वर्णितानि। कालिदास-बाणभवभूत्यादिपूर्वकवीनां वाक्शैली च कविनात्र तत्र तत्र अनुसृता। नेपालराजकीयवीरपुस्तकालये संरक्षिताया एकस्या मातृकाया आधारेण संपादितेऽस्मिन् ग्रन्थे ग्रन्थपाताः (पृ. २९, ३९), तथा बहवो मुद्रणप्रमादाश्च सन्ति॥ (स. सु. जा)

श्रीमत्सुनीतिभागवतम्

श्रीरामाचार्यविरचितम्। सुकृतीन्द्र इण्डोलाजिकल् ग्रन्थमाला नं. १. कोच्चिन्, केरलप्रदेशः। डा० जी. के. पाइ नामकैः संपादितम्। रू. १५.

श्रीसागररामाचार्याः गौडसारस्वताः, माध्वमतानुयायिनः बहूनां ग्रन्थानां कर्तारः। अस्मिन् विमृश्यमाने ग्रन्थे पूर्वार्धेन कापि नीतिरुच्यते, भागवतकथा च श्लोकस्योत्तरार्धेन। अत एवास्य सुनीतिभागवतमिति नाम। हृद्योऽयं काव्यप्रकारः। यतः अनायासेन काव्यास्वादः नीतिबोधश्च एकैकस्मिन् श्लोकेऽत्र भवतः। श्रीमद्भागवदेवात्रापि द्वादशस्कन्धाः। अक्लिष्टा काव्यशैली। सप्तत्यधिकचतुःशतानुष्टुप्छन्दोबद्धैः श्लोकैः काव्यमिदं निबद्धम्। आङ्ग्लानुवादसहितं, टिप्पण्या, श्लोकानुक्रमण्या च सहितम्। अस्य मुद्रणेन, संपादनेन च जिज्ञासूनां छात्राणां च संपादकैरुपकारः कृतः। श्रीमद्भागवतसंबद्धेन नीतिकाव्येन पुस्तककार्यं सुकृतीन्द्रविमर्शनसमित्या सम्यगेवोपक्रान्तम्। वर्धतामेषा संस्कृतसेवा नूतनाया अस्याः संस्थायाः॥ सौ. सूर्यकुमारी द्वारकादास्

शुकदूतम्

कविपण्डित श्रीहरचन्द्रकाव्यतीर्थविरचितम् (सटिप्पणं वङ्गानुवादसहितं च) १४३/१७७ पिक्निक् गार्डेन् रोड्, कलिकाता-३९। तृतीयं संस्करणम्। रू-५. छात्राणां कृते ४-७५।

कालिदासीयमेघसन्देशमुपजीव्य प्रवृत्तासु काव्यपरम्परासु आधुनिके अपि काले संदेशकाव्यरचनाया अविच्छेदं प्रथयदिदं शुकदूतं नाम हरचन्द्र-काव्यतीर्थविरचितं खण्डकाव्यं नूतनतमं वर्तते । अत्र विषयः कादम्बरी-चन्द्रापीडयोः विप्रलम्भः । मेघसन्देशः संपूर्णतया अनुसृतः कविना । गिरि-नदी-पत्तन-विशेषाणां नाम परिवर्तनं कृतम् वर्तते । मन्दाक्रान्तावृत्तघटितं भागद्वयविभक्तं पठनकाले कालिदासं सन्ततं स्मारयति शुकदूतमेतत् । कवेरात्मजेन श्रीनीरदचन्द्रचक्रवर्तिना स्वकीयया वङ्गानुवादेन च मुद्रितमद्य काव्यमिदम् ।

कविनानेन बङ्गलादेशे स्वदारिद्र्यक्लिष्टजीवयात्रां यापयित्वा मृतेन बहवो ग्रन्था रचिता इति भूमिकातो ज्ञायते । ते क्रमेण प्रकाशमर्हन्ति ॥ (कु. वे. शे.)

विवेकानन्दचरितम्

लेखकः-डा० गजानन पळसुले । शारदागौरवग्रन्थमाला २५ पुण्यपत्तनम्-३० । रू. १०.

प्रस्तुतस्य "विवेकानन्दचरित"स्य मूलाधारो विवेकानन्दस्वामीनां पौरस्त्य-पाश्चात्यैः शिष्यैः लिखितं मायावतीस्थ-अद्वैताश्रमेण प्रकाशितमाङ्ग्लभाषामयं विवेकानन्दचरितमेव । रोमा रोलाँ महाशयेन लिखितं "The Life of Vivekananda and the Universal Gospel", तथा अन्ये च बहवो ग्रन्थाः, तथा महाराष्ट्रभाषामयम् "विवेकानन्दजीवनम्" ग्रन्थकृतात्र उपयुक्ता सामग्री । "संस्कृतलेखने मम काचित् स्वीया शैली । संधिविषये "बहुलम्", पदविवेक-सेट्त्वानिट्त्वादीनां विषये क्वचित् शैथिल्यं स्यात्; मित्रशब्दः सदैव पुंसि प्रयुक्तोऽस्ति । केऽपि नूतनाः शब्दाश्च निर्मिताः; चित्वम्, टेबल इत्यादय उर्दू-शब्दास्तथैव स्थापिताः । सर्वमिदं संस्कृतं सुबोधं कर्तुमुपकुर्यादिति" लेखकस्य किंचित् संस्कृतभाषां प्रति स्वातन्त्र्यं यदत्र प्रकटितं तद् विद्वांसः अङ्गीकरिष्यन्ति वा न वा इति इतः परमेव ज्ञातव्यम् । चरित्र-नायकस्योदारत्वाच्चरित्रलेखोऽयं हृद्य एव । लेखनशैली महाराष्ट्रीभाषाश्रया । अष्टादशाध्यायपूर्णो ग्रन्थोऽयं पठितुं हृद्यो भवति ॥ (सू. कु. द्वा.)

धर्मशीलतीर्थाटनम् अर्थात् श्रीकृष्णार्यतीर्थयात्राविजयः

श्रीवेङ्कटरामशास्त्रिणा विरचितः । तत्पुत्रेण के. वि. श्रीकण्ठेन प्रकाशितः । रामायणमुद्रणालयः, मद्रास्-४ । १९७२ ।

ग्रन्थकर्तुः करुप्पुत्तूर-वेङ्कटरामशास्त्रिणः कालः १८६९-१९२७ । ते (केरलस्थ) चित्तूर-संस्कृत-पाठशालायामध्यापका आसन् । पाठशालास्थापका आस्तिका आढया 'धर्मशील'-कृष्णार्याः १९१४-वर्षे भारततीर्थयात्रामन्वतिष्ठन् । तैस्सह यात्राकृत्स्वन्यतमोऽयं ग्रन्थकर्ता सर्वामेव यात्रां संस्कृतभाषया गद्यशैल्या अवर्णयत् , यद्वर्णनमत्र पुत्रधर्मं सम्यगनुतिष्ठता श्रीश्रीकण्ठेन मुद्राप्य प्रकाशितम् । यात्रावर्णनं विषयः, गद्यरूपेण निबन्धनम् इत्युभयथापि उपादेयमिदं पुस्तकम् । 'धर्मशील'-कृष्णार्यस्य संक्षिप्तं चरितं, ग्रन्थकर्तुर्वंशावलिः, तीर्थक्षेत्राणां तत्र दृष्टानां पण्डितानां सूची, इत्याद्युपबृंहणसहितमिदं प्रकाशनम् । अभिनन्दनीयः प्रकाशकस्य प्रयासः ॥ (वे. रा.)

सुमनोऽञ्जलिः (सटिप्पणः)

के. राजन्न शास्त्री । 12-7-112-7-6, केशवनगरम् , लङ्गुड, हैदराबाद्-१७ । रू. २-५० ।

अत्र राजन्नकविना रचितानि १६ खण्डकाव्यानि मुद्रितानि । नानाविषयकेष्वेषु खण्डकाव्येषु श्लेषे अर्थान्तरसमाधौ च रचयितुः प्रावण्यं प्रावीण्यं च प्रकाशेते । यद्यप्येषु काक-कोकिल-देवतावर्णनादिप्राचीनपरिचितविषया उपात्ताः, तथापि आधुनिक-राष्ट्रीय-सामूहिक-विषयपरिस्फूर्तयो वर्तन्त एव । श्लिष्टश्लोकाः केचिन्मनाक् क्लिष्टा दृश्यन्ते । केचन निबन्धा अत्र भारतराष्ट्रतन्त्रंश्चाधिकृत्य रचिताः ॥ (वे. रा.)

पूर्वभारतम्

श्रीप्रभुदत्तस्वामिद्वारा विरचितमहाकाव्यस्य सर्वाङ्गीणविमर्शात्मकोऽयं ग्रन्थः । श्रीगङ्गेशदत्तशास्त्री-विष्णुदत्तशास्त्री-स्वयंप्रकाशशास्त्रिभिः अन्योन्यसहायेन रचितोऽयं ग्रन्थः । ज्ञानप्रकाशन् , सुभाष-बाजार् , मीरट्-२१.

महाभारतकथानकमारभ्य सिकन्दर्-महाराजस्य (अलक्साण्डर्) स्वदेशगमनं यावत् प्रामाणिकं प्राचीनार्यावृत्तेतिवृत्तं पुरस्कृत्य सर्गबन्धादि-महाकाव्यलक्षणलक्षितं चरित्रसंबद्धं महाकाव्यं श्रीप्रभुदत्तस्वामिरचितं विदितचरमेव । तत्काव्यस्य परिचयः ग्रन्थस्यास्य विषयः । काव्यं आन्तं लौकिकदृष्ट्या मनोवैज्ञानिकदृष्ट्या चारित्रकदृष्ट्या च सम्यग् विमृष्टं दृश्यते शास्त्रिभिः। अलंकारविशेषाणां वृत्तविशेषाणामितिवृत्तविशेषाणामपि विशिष्य समालोचना कृता । विमर्शनेनानेन पूर्वभारतस्य अन्तरात्मा प्रकटी-कृतो वर्तते ।

पारिजातमञ्जरी

जगन्नाथरिवूशस्त्री ७, भट्टयार् आली कद्ल्, श्रीनगरं-२, काश्मीरः ।

काश्मीरभाषातः संस्कृतानुवादः श्रीजगन्नाथशास्त्रिभिः कृत आमोदन-मर्हति। काश्मीरेषु परमानन्दाभिधैः (१७९१-१८८०) स्वीया अमरनाथ-क्षेत्रयात्रा वर्णिता, साऽत्र संस्कृतभाषयानूदिता ॥

गेय-गैर्वाणी

संकलयिता आ. वरदराजः । संस्कृतभाषाप्रचारिणी सभा, चित्तूर् (आ. प्र.) । रू. २.

आन्ध्रप्रदेशे चित्तूर्-नगरे संस्कृतभाषाप्रचारिणीति सुविदिता सभा संस्कृतभाषापरीक्षाणां प्रवर्तयित्री श्लाघनीयां सेवां पञ्चविंशतिवर्षाणि निर्वर्तिवती संप्रति रजतोत्सवेन समेधते । अनया सभया 'गैर्वाणी' इति सुलभैः संस्कृतनिबन्धैः प्रतिमासं प्रकाश्यमाना पत्रिकापि वर्तते । तस्यां पत्रिकायां विविधेषु विषयेषु गेययोग्या बन्धाश्च तदा तदा प्रकाशिताः, एकस्मिन् संपुटे संकलय्य रजतोत्सवावसरे उपहारीकृताः । गेयेषूपात्ता विषया विविधाः-संस्कृतभाषा, भारतराष्ट्रं, धर्मः, गौः, कृषिः, पतङ्गक्रीडा, गान्धिः, समरपिशाचिका, प्रजाप्रभुत्वम्, क्षामदेवता इत्यादिकाः ॥ (वे. रा.)

काव्यप्रकाशे चतुर्थोल्लासः (Mammaṭa's Kāvyaprakāśa-IV)

आर्. आर्. अम्बर्देकरेण सम्पादितम् । कुर्ला, मुम्बई, १९७ . रू. १०-००.

काव्यप्रकाशस्य चतुर्थोल्लासे अलङ्कारशास्त्रस्य मौलिकः प्रश्नो ध्वनिनिर्णयः संक्षेपेण सोदाहरणं प्रदर्शितः । एष उल्लासः मुम्बई-विश्वविद्यालये स्नातकोत्तर-दशायां छात्रैः पठितव्यत्वेन निवेशितः । तेषामुपयोगार्थं प्रस्तुते मुद्रणे केवलश्चतुर्थोल्लासः अम्बर्देकरेण स्व - आङ्ग्लानुवादविवरणादिभिरायोज्य संपादितः ॥ (स. सु. जा.)

अभिनवरससिद्धान्त

डा० दशरथ द्विवेदी । विश्वविद्यालयप्रकाशनम्, वाराणसी, १९७३, रू. ६. ०० ।

भरतमुनेः रससूत्रं (नाट्यशास्त्रे षष्ठाध्याये विद्यमानम्) अभिनवगुप्तस्य विस्तृतेन व्याख्यानेन सह प्रस्तुते ग्रन्थे डा. दशरथद्विवेदिना हिन्दी-भाषायामनूदितम् । रससिद्धान्तस्य इतिहासोऽपि भूमिकायां दत्तः । रसशास्त्र-जिज्ञासूनां हिन्दीप्रपञ्चच्छात्राणां चोपकरकोऽयं ग्रन्थः । (स. सु. जा.)

साहितीजगती

काल्लूरि हनुमन्तरावः, के. वि. शेषुभाई, ओ. यु. बि. एफ्. ७, युनिवर्सिटी काम्प्, हैदराबाद्-७ (आ. प्र.) । १९७३ । रू. ५.

काल्लूरि-हनुमन्तराव-महोदयानां लेखनीतो निःसृतोऽयं 'साहिती-जगती'-नामको ग्रन्थः आधुनिकसंस्कृतसाहित्यपोषणे उपकरोति । पाश्चात्यविमर्शक-प्रचोदनया उद्भाविता एते महोदयाः काव्यशास्त्रस्य विमर्शनं कृतवन्तः । तत्तत्-सिद्धान्तस्थापनाय आङ्ग्लभाषायामपि उद्धरणानि उद्धृतान्यत्र वर्तन्ते । आधुनिकविद्याध्ययनप्रणालीमनुसृत्य रचितोऽयं पाठ्यग्रन्थप्रणाल्यां निवेशयितुं योग्यः ॥ (कु. वे. शे.)

भारतीयकाव्यसाहित्यम्

(Indian Kāvya Literature) प्रथमो भागः-साहित्यविमर्शः ।

ए. के. वार्डर्, संस्कृतप्राचार्यः, टोराण्टो-विश्वविद्यालयः, कनेडा । मोतीलाल् बनारसी-दास्, देहली-७ । रू. ४०.

इतःपूर्वं प्रकाशितानि संस्कृत-साहित्यवर्णनपुस्तकानि प्राय इतिहास-प्रधानानि, न तु काव्यनाटकादीनां साहित्यांशसमालोचनात्मकानि इति कृत्वाऽत्र प्रवृत्तोऽयं पाश्चात्यसंस्कृतप्राचार्यः कमपि नूतनसंस्कृतकाव्यादिपरिशील-ग्रन्थमत्र समर्पयति । पूर्वतनेषु पुस्तकेषु संस्कृतसाहित्यस्य पाश्चात्य-साहित्या-पेक्षया अवरत्वमेव आङ्ग्लेय-शासकानां शासनदृष्ट्या विरचिततया प्रदर्शि-तम् । अभिप्रैति चायं ग्रन्थकर्ता समीचीनमेव यदत्र भारतस्वातन्त्र्यानन्तरं स्वतन्त्रतया केवलसाहित्यास्वाददृष्टिप्रेरणयैव संस्कृतनिर्मितीनामवलोकन-मवश्यकार्यमिति ।

१. काव्यस्य भाषाः, संस्कृतप्राकृतादि;
२. भारतीयः काव्यशोभाविचारः
३. भरातीयं नाट्यशास्त्रम्-रूपकशरीरनिर्माणप्रक्रिया
४. अलङ्कारशास्त्रम्
५. रूपकम
६. महाकाव्य-खण्डकाव्यानि
७. कथाख्यायिकाचम्प्वादि
८. रूपकप्रेक्षकाः, काव्याध्येतारश्च, कवयः

इति अष्टाध्यायैरत्र परिशीलनं भवति ।

अत्र व्यवहृता विषयाः परिचिता अपि तद्विचारदृष्टिः नूतना ; अतश्च समुपादेयोऽयमारम्भः प्राचार्य-वार्डर्-महाशयस्य ॥ (वे. रा.)

केरलीयसंस्कृतसाहित्यकोशः

(Sanskrit Literature of Kerala—Index of Authors with their Works)

ई. ईश्वरन् - नम्बूतिरि, संस्कृतविभागः, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९७२; रू. १५.०० ।

संस्कृतवाङ्मये केरलस्य यद् अवदानं विस्तृतं वैशिष्ट्यपूर्णं च तद् उल्लूर् परमेश्वर अय्यर्-प्रभृतिभिः पथप्रदर्शिभिरर्वाचीनैस्तदनुयायिभिः श्रीकुञ्जुण्णिराजाद्यैश्च प्रपञ्चितमेव । तथापि विविधसंस्कृतविभागेषु एतद्योगदानं सर्वमेकेक्षिकया एकस्मिन् ग्रन्थे सङ्ग्रहेण नाद्यावधि

उपन्यस्तम् । अत ईश्वरन् - नम्बूतिरिणा संकलिता केरलीयसंस्कृतग्रन्थ-कर्तॄणामेषा सूची उपकाराय भविष्यति गवेषणप्रवृत्तानाम् । अत्र आङ्गलभाषाया अकारादिक्रमेण निबन्धॄणां नाम, एकैकस्य कालः, तेन कृता मुद्रिता अमुद्रिताश्च ग्रन्था निर्दिष्टाः । अज्ञातकर्तृकाणां ग्रन्थानां सूच्यपि दत्ता । विस्तरेण वर्णितव्यस्य संपूर्णकेरलीय-संस्कृतसाहित्य-चरितस्य रूपरेखा-सूचक उपयोगी भवेदेष कोशः । (स. जु. जा.)

भारतस्य संविधानं पद्यमयम् - विभागाः १-४.

निबन्धकः—एम् . एम् . दवे. १; ६ सूर्यकमल फ्लाट्स् । ठाकूर् नाट्य-गृहपार्श्वे, एलिस् ब्रिज्, अहमदाबाद्-६.

श्री. दवे महोदयैरुपक्रमे "गद्यते भारतीयस्य संविधानस्य संस्कृते । चत्वारः प्रथमे भागाः पद्यरूपेण वै मया ॥" इत्युक्तप्रकारेण राष्ट्रीयं संविधानं (Indian Constitution) अत्र संस्कृतभाषायामनूदितमस्ति । वामपृष्ठे आङ्ग्लभाषायां संविधानस्य नियमाः, दक्षिणपृष्ठे संस्कृतपद्यनिबन्धने च दत्ताः सुलभबोधका भवन्ति । अद्यापि भारतवर्षे सन्ति बहवः येषां गीर्वाणवाण्ये-वैका अवगता, नाङ्ग्लभाषा । तेषामर्थे भारतसंविधानं संस्कृतनिबद्धमुपयोगि स्यात् । भारतसंविधानसारांशोऽत्र विद्यते ॥ (सौ. सू. द्वा.)

संस्कृतशिक्षकम्

लेखकः—पं. गोपालशास्त्री, दर्शनकेसरी । विश्वविद्यालयप्रकाशनम् , वाराणसी । रू. ३ ॥

अत्र पाणिनीयव्याकरणस्य नवीकरणे, संक्षेपे च प्रयत्नो दृश्यते । प्राचीनरीत्या संस्कृतभाषापठनं, पाठनं चातीव कठिनं कालव्ययकरं चेति बहवः तत्र निराशा जाताः । यद्यपि संस्कृतसाहित्यं सर्वथा परिपूर्णमिति ते जानन्ति तथापि मूलसंस्कृतग्रन्थास्तेषामप्राप्या एव । येन केनापि भाषान्तरेणैव तत्र तेषां प्रवेशः । एतादृशानां जिज्ञासूनामर्थे इदं व्याकरणपुस्तकम वरप्रदान-मिव भवति । अस्य ग्रन्थस्य कर्ता उद्घोषयत्यत्र यन्ममपुस्तकस्य षण्मासपठनं संस्कृतसाहित्यवाचनायालं ज्ञानं समर्पयितुं शक्तमिति । चतुर्दशशिवसूत्रेभ्यः आरभ्य संधिप्रकरणं, धातुप्रकरणं, शब्दरूपाणि, तद्धितकृत्प्रकरणौ इत्यादि

लिङ्गानुशासनपर्यन्तम् सर्वं पाणिनीयव्याकरणं संक्षेपेण राष्ट्रभाषाव्याख्यायुतं चास्मिन् पुस्तके संकलितमस्ति। पाठशालोपयोगि पुस्तकमिदम्। जिज्ञासूनामन्येषां चाचार्यं विना स्वयमेव पठितुमुपकारीदं भवेत्।

प्रारम्भिकरचनानुवादकौमुदी, रचनानुवादकौमुदी च

डा. कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशनम्, वाराणसी-१। नवमं संस्करणम् १९७२। रू. ४-५०, १-८०।

डा. कपिलदेवद्विवेदिना रचितमिदं ग्रन्थद्वयं, प्रारम्भिकोच्चतरकक्ष्ययोर्व्याकरणविद्यार्थिनां कृते अत्यन्तमुपकरोति। आधुनिकसंस्कृतविद्यार्थिनः, तत्रापि विशिष्य व्याकरणशास्त्रे प्रविविक्षवः प्राचीनव्याकरणग्रन्थाध्ययने काठिन्यानुभवं प्रदर्शयन्ति। तदेतन्मनसि निधाय द्विवेदिभिः शब्दरूपाणां क्रियाविशेषाणां प्रक्रियाविशेषान् सरलतया प्रतिपाद्य नूत्ना कापि-अध्यापन-परिपाटी एतद्ग्रन्थद्वयद्वारा प्रकटीकृता भवति। वस्तुतः एतादृशग्रन्थाणां आविर्भावस्य अयमेव कालः। अन्ते नियोजितो भाषान्तरीकरणस्य, रचनायाश्च अभ्यासः, भाषाप्रावीण्यसंपादने समर्थो भवति॥

'महत्तरं रामायणम्' (The Greater Rāmāyaṇa)

डा. वे. राघवः, अखिलभारतीय-काशीराज-निक्षेपेण (All-India Kashiraj Trust) प्रकाशितम्। वाराणसी, १९७३. पृ. ९१. मूल्यं रू. २५. (साधारणबन्धः); रू. ३० (उत्कृष्टबन्धः)।

रामायणेतरपुराणेतिहासग्रन्थेषूपलभ्यमानां रामायणकथां, तदंशान् तद्गतान् भेदांश्चाधिकृत्य विवरणमत्र दत्तमिति ग्रन्थस्यास्य नामैव सूचयति। अत्र विमर्शितो विषयो डा० राघवार्यैः गत-१९७१ संवत्सरे मद्रपुरी-विश्वविद्यालये दत्ते व्याख्यानद्वये प्रतिपादितः।

अत्र रामायणमहाभारतग्रन्थयोः परस्परकालक्रमस्थितिं विचार्य, विन्टर्निट्स-यकोबि-प्रभृतीनां पाश्चात्यपण्डितानां तथा भारतीयानां सुकथंकरादीनां च मतानि उद्धृत्य महाभारतस्याद्योपलभ्यमानरूपप्राप्तेः पूर्वमेव रामायणस्य पुरातनता अङ्गीकार्या भवतीत्युपन्यस्तम्।

विस्तृत्य महाभारतवनपर्वस्थरामकथा, तथा तत्र विविधेषु सन्दर्भेषु महाभारते दृश्यमाना रामायणश्लोकाः, रामायणार्थाश्च संकलय्य विचारिताः। अतश्च सहोत्तरकाण्डं रामायणकाव्यं भारतरचनाकालेऽपि विश्रुतमभवदित्यस्माभिर्ज्ञायते।

भारतस्य परिशिष्टतया गणिते हरिवंशेऽपि रामायणकथा त्रिषु सन्दर्भेषूपयुक्ता, साप्यत्र परिशीलिता। तदनन्तरं पुराणेषु दृष्टा विविधा रामायणकथाभागाः सम्यक् विचार्य, तत्र दृश्यमाना भेदाश्च प्रदर्शिताः। सुलिखितेऽस्मिन् ग्रन्थे राघवार्यैरुपन्यस्ता एकत्र समानीता विपुला विषयाः रामायण-कथा-रसिकानां तत्र परिशीलनं कर्तुमुद्युक्तानां च विदुषामत्यन्तमुपकारकाः भवेयुः।

पुराणेतिहासाध्ययनप्रोत्साहनकार्येऽस्मिन् ईदृशानां ग्रन्थानां प्रकाशने भारतीयकाशीराजनिक्षेपेण दर्शित उत्साहः सर्वैरपि विद्वद्वर्यैरवश्यं प्रशंसनीयः।

(न. गङ्गाधरन्)

संस्कृतवाङ्मये ऋतुः

रचयिता डा० वे. राघवः। श्री लाल्बहदूर् शास्त्री केन्द्रियसंस्कृतविद्यापीठः, देहली, १९७२ रू. ३०।

१९७०-तमे वर्षे देहलीनगरस्थस्य श्री लालबहदुर् शास्त्रि केन्द्रीयसंस्कृतविद्यापीठे प्रचलितं शारदीयज्ञानमहोत्सवं पुरस्कृत्य डा० वे. राघवमहोदयैः कृतानां त्रयाणामुपन्यासानां सङ्कलनरूपः प्रकृतः आङ्ग्लग्रन्थः। अस्य च विषयः "संस्कृतवाङ्मये ऋतुः" इति कोऽपि नूत्नः इदंप्रथमतया समुपात्तः। बहुषु गुरुतरकर्मसु व्यापृता अप्येते प्राचार्याः अमुमतिविपुलं विषयमधिकृत्य अनन्यसुलभेन मतिपाटवेन, अप्रतर्क्यविभवेन कूलङ्कषवैदुष्येन च उपन्यासानकार्षुरिति, ते चोपन्यासाः सकलसंस्कृतरसिकैरिदानीमनेन ग्रन्थरूपेण पठितुं शक्यन्त इति प्रमोदस्थानमेतत्।

ऋतुरिति पदस्य निरुक्तिं तस्य ऋतूनां संख्यां यज्ञसंबन्धं च वेदेषु प्रतिपाद्य, रामायणमहाभारतहरिवंशादिष्वितिहासेषु, ब्रह्मविष्णुब्रह्माण्डादिषु पुराणेषु, कालिकादिषूपपुराणेषु च ऋतूनां काव्यशैल्या वर्णनम्; चरकसु-

श्रुतादिष्वायुर्वेदग्रन्थेषु, कामसूत्रेषु, अर्थशास्त्रे, तथाऽन्येषु च शास्त्रेषु दृष्टान् ऋतुव्यवहारान् निरूपयन्ति प्रथमोपन्यासे । कालिदास-भारवि-भट्टिप्रभृतीनां महाकाव्येषु, ततो रूपकेषु, चतुर्भाण्यां, राजशेखरस्य नाटकेषु च ऋतुवर्णनमधिकृत्य द्वितीयोपन्यासे विमृशन्ति । अलङ्कारग्रन्थेषु, नाट्यशास्त्रे चास्य प्रयोगवैचित्र्यमुपपादितं तृतीये । जिनसेन-अभिनन्द-क्षेमेन्द्र-बिल्हणप्रभृतीनामर्वाचीनानां काव्येषु ऋतुवर्णनानि परीक्षितानि चतुर्थे । पञ्चमे गद्यचम्पूकाव्यानि, षष्ठे सुभाषितावल्यादयः सङ्कलनग्रन्थाः, सप्तमे वेदान्तदेशिकनीलकण्ठदीक्षितादीनां कवीनां काव्यानि, अष्टमे लघुकाव्यानि च महता कौशलेन विमृष्टानि । नवमे ऋतोः मनुष्यजीवने प्रभावः, तस्याः प्रामुख्यं, प्राबल्यम् इत्यादयो बहवोंऽशा निरूपिताः । अन्त्येषु भागेषु संस्कृतपद्यसूची, सङ्कलनग्रन्थेभ्य उद्धृता ऋतुश्लोकाः, अन्ये संबन्धिनो विषयाः, उपयुक्तग्रन्थानां, तत्कर्तॄणां आङ्ग्लभाषीयसूची च उपनिबद्धाः प्रकृतस्य ग्रन्थस्य प्रयोजनं प्रगुणयन्ति ।

तथा च ग्रन्थोऽयं डा० वे. राघवमहोदयानां नवनवोन्मेषशालिन्याः प्रतिभायाः प्रमुखोदाहरणं भवितुमर्हति। विषयस्य मनोहरता, प्रतिपादनपद्धत्याश्च सौष्ठवम् तत्तत्कविकृत-ऋतु-वर्णनानां सौन्दर्यपरिशीलनसमास्वादसारस्यं च पठितॄणां कमप्यानन्दं जनयतः । प्राचार्याणां सुपरिणतविमर्शनपाटवं सकलसंस्कृतवाङ्मयपारदर्शित्वं च ग्रन्थे प्रतिपदं स्फुटीभवति । सर्वात्मना अयं प्रबन्धः संस्कृतसाहित्यस्य कोऽपि नूतनोऽलङ्कारो विराजतेतराम् ॥

(डा. मु. न.)

मलयमारुतः

तृतीयः स्पन्दः-राष्ट्रीयसंस्कृतसंस्थानीय-प्रकाशनमित्यध्यक्षैः डा. वे. राघवार्यैः संपादितः । केन्द्रीयशिक्षामन्त्रालयाङ्ग-राष्ट्रीयसंस्कृतसंस्थानेन प्रकाशितः-नवदेहली १९७३ । रू. ५. ।

'मलयमारुत' इति यथार्थनामाऽयं प्रबन्धः संस्कृतसाहित्ये लधूनाम्, एतावता अमुद्रितानां काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां वाङ्मयप्रभेदानाम् एकत्र सङ्ग्राहकरूपः, तदा तदा डा. वे. राघवमहोदयैः सम्पाद्यमानः सहृदयचमत्कारमातन्वानः सुरभिशीतलो मलयपवन इव रसिकानन्दावहः

प्रचलतीति जानन्त्येव संस्कृतप्रणयिनः । अस्य प्रथमः स्पन्दः १९६६-तमे वर्षे, द्वितीयः १९७१-तमे वर्षे चाभूतामिति च विदितमेव । तस्यायं तृतीयः स्पन्दः विमृश्यमानो ग्रन्थः ।

अगाधे अपारे च संस्कृतसाहित्यरत्नाकरे निगूढानां समुद्धर्तार एते प्राचार्या इति विदितमेव । एवं हस्तलिखितकोशेभ्य उद्धृत्य अस्मिन् सङ्ग्रहे श्रीसाम्बसदाशिवस्तवः, शारदातिलकम्, सुलैमचरितम्, कविकण्ठाभरणम्, मनोगर्हणम्, प्रास्ताविकश्लोकाः, सुभाषितसुधानन्दलहरी, पलाण्डुमण्डनप्रहसनम् इति च वर्तन्ते अष्टौ ग्रन्थाः । एकैकस्यापि ग्रन्थस्य सम्पादकैः प्राचार्यैः स्वकीयसम्पादनकर्मकौशलेन पाठभेदाः, कठिनपदार्थविवरणं, ग्रन्थान्तरतोलनम् इत्यादयो विशेषाश्च प्रतिपादिताः । सुलैमचरितमिति प्रबन्धस्तु हिब्रूदेशीयकथा, भारतीयकथेव विरचितः श्रीकल्याणमल्लकविना इति विशेषः । अन्तिमोपात्तस्य पलाण्डुमण्डनप्रहसनस्य आङ्ग्लभाषया कथासंग्रहोऽपि समर्पितः । इदं च रूपकं डा. राघवानां आध्यक्ष्ये मद्रनगरे संस्कृतरङ्गेन अभिनीतं इति च विदांकुर्वन्तु सहृदयाः । एतादृशलघुकृतीनां सम्पादनेऽपि बृहद्ग्रन्थसम्पादने यावती श्रद्धा जागरूकता च, यादृशी विमर्शनप्रक्रिया तावदेव सर्वं प्रदर्शयन्ति प्राचार्य इति आववेयोऽयमंशः सर्वैः विमर्शनप्रकाशनादिशोधकार्यमार्गव्यवसायिभिः ॥ (डा. मु. न.)

रघुवंशः

आङ्ग्लभाषानुवादः-अनुवदिता श्री के. अनन्तपद्मनाभार्यः, रामायण-मुद्रणालयः, मद्रपुरी-४.

महाकविना कालिदासेन रघुवंशमहाकाव्यम् एकोनविंशतिसर्गात्मकं निर्मितम् । तस्य आङ्ग्लपद्यानुवादरूपः प्रकृतो ग्रन्थः । बहोः कालात् पूर्वमेव रैडर्-प्रभृतिभिः पाश्चात्यैरन्यैश्च अनूदितमपीदं काव्यमिदानीमपि रचयितॄन्, अनुवादकर्मणि प्रेरयतीति विदितमेव तस्य माहात्म्यम् । आङ्ग्लपद्यरूपेण भूतपूर्व-आङ्ग्लभाषाचार्येण श्रीमता अनन्तपद्मनाभमहाशयेन विरचितोऽयमनुवादो नूतनः, यस्य मुद्रणे केन्द्रीयसंस्कृतपरिषदा धनोपकारः कृतः ।

यद्यपि मूलग्रन्थस्य वैभवं, गाम्भीर्यं रमणीयता च यथावदनुवदितुं न केनापि शक्यते, तथापि आङ्ग्लभाषायां सुप्रसिद्धया "ब्लांक् वर्स्" इत्याख्यया छन्दःप्रक्रियया हृदयङ्गमः कृतोऽयमनुवाद इति प्रमोदस्थानमेतत् । पठितॄणां सुलभावगाहार्थं शीर्षिकामूलेन विषयविभागः कृतो वर्तते । "वकुल"—"चक्रवाका"दिपदानि अतिप्रसिद्धत्वात् सुबोधत्वाच्च नानूदितानि ग्रन्थकृता । किन्तु तादृशानां पदानां विवरणम् अधोदीपिकासु (foot-notes) कृतमस्ति ।

अयं चानुवादः संस्कृतभाषापरिचयशून्यानां, केवलमाङ्ग्लभाषायामेव लब्धप्रवेशानां पठितॄणां प्रीणनाय कृत इति ग्रन्थकृद्भिः अवतारिकायामाविष्कृतम् । अयं चाशयः सर्वथा सफलीभविष्यति इति विश्वसिमः । डा० वे. राघवार्याणामामुखोक्त्या भूषितोऽयं ग्रन्थः ॥ (डा० मु. न.)

कालिदासकृतिभ्यः अन्यैरुद्धृताः श्लोकाः (Kalidasa-Citations)

एन्. आर्. सुब्बण्णा । प्रकाशकाः, मेहर्चन्दलक्ष्मणदासः, दिल्ली १९७३. रू. ३६.

कविकुलगुरोः कालिदासस्य ग्रन्थेभ्यो बहवोऽन्यकृतिकर्तारो, विशिष्य आलङ्कारिका बहून् श्लोकान् उदाहरणतया स्वीचक्रुरिति विदितमेव समेषाम् । १९१७ तमे वर्षे डा. हरिचन्द्रशास्त्रिमहोदयाः अलङ्कारग्रन्थेषु उदाहृतान् कालिदासीयश्लोकान् अधिकृत्य फ्रेञ्च्-भाषायां विमर्शनं कृतवन्तः । ततः पश्चात् बहवो मुद्रिता अमुद्रिताश्च कृतयः प्राकट्यमागताः, यासु महाकवेरस्य श्लोका उदाहृताः तत्तन्निबन्धृभिः । एतान् सर्वानपि ग्रन्थान् समालोड्य तत्रत्यान् विशेषान् आङ्ग्लभाषया न कोऽप्येतावता पण्डितः प्रकटीचकार । डा. वे. राघवार्यमहोदयानामाध्यक्ष्ये श्रीमतां सुब्बण्णार्येण एतादृशश्लोकानां सङ्कलनं कृत्वा, तत्रत्या विमर्शविषया अपि सोपपत्तिकं विचार्य प्रकटिता इति स्पष्टमेव प्रकृतस्य ग्रन्थस्य प्रामुख्यम् । अत्र मुद्रिताश्च कृतयः ३९ संख्याकाः परिशीलिताः । सहस्रादधिकं वर्तन्ते सङ्कलिताः श्लोकाः । अनेन न केवलं अलङ्कारग्रन्था अपि तु व्याख्यानानि, सङ्कलनग्रन्थाः, नाट्यशास्त्रकृतयश्चावलोकिताः ।

अस्मिन् विमर्शनग्रन्थे विभागद्वयमस्ति । प्रथमे भागे कालिदासीयश्लोकानां अन्यग्रन्थेषु उद्धृतानां पट्टिका दत्ताः । एतासु पट्टिकासु श्लोकस्य

आकरः, उदाहरणग्रन्थः, उदाहरणनिमित्तं, पाठभेदा इत्येतेंऽशाः सूचिता वर्तन्ते ।

द्वितीयस्तु विमर्शनात्मकपरिशीलनेन पण्डितमण्डलीषु समुत्पन्नाः काश्चित् समस्याः सोपपत्तिकं समाकलयति । अत्र अष्टसंख्याकाः चर्चानिबन्धा वर्तन्ते । तेषां विषयास्तु - अभिज्ञानशाकुन्तले दृष्टानां केषांचिदधिक-श्लोकानां प्रामाणिकता; तत्रत्यस्य "ग्रीवाभङ्गाभिरामम्" इत्यादेः श्लोकस्य रसाभासप्रतिपादकत्वाक्षेपनिरासः; विक्रमोर्वशीयनाटकस्य चतुर्थेऽङ्के उपलब्धानां केषांचित् प्राकृतभाषानिबद्धश्लोकानां प्रामाणिकता; तत्रत्यानां केषांचिद् अधिकश्लोकानां प्राचीनता; कुमारसम्भवमहाकाव्यस्य अष्टमसर्ग एव समाप्तिरिति निर्णयः, तत्रत्याः पाठभेदाः; रघुवंशान्तर्गतानां अकालि-दासीयानां श्लोकानां कर्तृत्वविचारः; मेघदूते प्रक्षिप्तानां श्लोकानां विचारः- इत्येते विषयाः सप्रमाणं सुनिपुणं च प्रतिपादिताः । एतं गन्थमधिकृत्य मद्रास्-विश्वविद्यालयद्वारा 'एम्-लिट्' (M. Litt.)-पदवी च ग्रन्थकृता लब्धा ।

एवं बहुविधविषयविचारणप्रकृष्टस्य ग्रन्थस्यास्य प्रबन्धा श्रीसुब्बणार्यः भृशमभिनन्दनीयः । (डा. मु. न.)

कालिदासविशेषाङ्कः

जम्मूविश्वविद्यालयपत्रिका; स्नातकोत्तरसंस्कृतविभागः, जम्मू, तवी । सम्पादिका- डा. वेदकुमरी । रू. २.

ग्रन्थेऽस्मिन् संस्कृत-हिन्दी-भाषामयनिबन्धात्मकं विभागद्वयं वर्तते । तत्र प्रथमे भागे संस्कृतनिबन्धसहिते, महाकवेः कालिदासस्य कृतिषु दृश्यमाना प्रतिकर्मसामग्री, उपलभ्यमानं काव्यबिम्बं, कर्मतत्त्वं, कवेरस्य शिक्षाशास्त्रित्वम् इत्येता विषया सुनिपुणं निरूपिताः । डा. वेदकुमार्या विरचिते प्रथमनिबन्धे कालिदासग्रन्थेषु दृश्यमानानाम् अङ्ग-प्रत्यङ्ग-वेषभूषणविधानानां, केशप्रसाध-नरीतीनां च सोदाहरणं विमर्शनं कृतं वर्तते । कवेरस्य ग्रन्थेषु उपलभ्यमानं विद्याशिक्षणविधानादिवर्णनं तदनन्तरे निबन्धे कृतमस्ति ।

हिन्दीविभागे अस्य कवेः अनन्यसाधारणां प्रतिभां पुरस्कृत्य लिखिताः एकादशनिबन्धाः वर्तन्ते । कालिदासस्य शब्दप्रयोगवैचित्री, व्याकरणशास्त्र-

परिज्ञानं, प्रकृतिवर्णनचातुर्यम्, आयुर्वेदसमधिकविज्ञानम्, इत्यादयोंऽशाः पठितॄणां कमप्यानन्दमाविर्भावयन्ति । बिल्हणादीनामुपरि कवेरस्य प्रभावं विशदयन्ति केचित् निबन्धाः ।

एवं नवीनान् चमत्कारावहांश्च बहूनंशान् प्रतिपादयन् अयं कालिदास-विशेषाङ्कः चर्चासाहित्यस्योपबृंहको भवति, अभ्युपेयश्च सर्वैः रसिकैरवश्य-पठनायेत्यभिप्रेमः ॥ (डा. मु. न.)

अलङ्कारशास्त्रसम्बद्धान् कांश्चित् विषयानधिकृत्य विरचिता विमर्शात्मक-निबन्धाः (Some Concepts of Alankara Sastra) । रचयितारः-डा. वे. राघवार्याः, मद्रपुरी-२०, अडैयार् ग्रन्थालयेन प्रकाशितं, संशोधितं द्वितीयं संस्करणम् १९७३. रू. २५ ।

प्रसिद्धैः कविपण्डिताग्रेसरैः आलङ्कारिकमूर्धन्यैः डा. वे. राघवमहोदयैः विरचितोऽयं आङ्ग्लभाषामयो ग्रन्थः १९४२-तमे वर्षे प्रथमं मुद्रितः । अलङ्कारप्रपञ्चे परां प्रसिद्धिं प्राप्तश्चायं ग्रन्थः । ततो बहुकालं अलभ्यमानः, पण्डितैः साभिलाषं प्रतिपालितश्चायमिदानीं द्वितीयवारं मुद्रितः ।

रसः, अलङ्कारः, रीतिः, ध्वनिः, औचित्यम् इत्यादयोंऽशाः काव्यजी-वितभूता भरतभामहवामनानन्दवर्धनप्रभृतिभिः तेषु तेषु ग्रन्थेषु सम्यङ् निरूपिताः । तान् सर्वानपि ग्रन्थान् परिशील्य अनितरसाधारणेन च आङ्ग्ल-भाषापाटवेन प्राचार्या राघवमहोदया प्रबन्धेऽस्मिन् प्रतिपादयांचक्रुः । लुप्तस्य लक्षणाख्यप्रस्थानस्य विचारः, अलङ्काराणां सुप्रयोग-अपप्रयोगौ, स्वभावोक्तिः, भाविकम्, रीतिः, वृत्तिः, औचिती, चमत्कारः, सौन्दर्यम्, अलङ्कारशास्त्रस्य नामानि इत्यादयो विषया अतिनिपुणया सरलया च शैल्या निरूपिताः । अलङ्कारप्रयोगमधिकृत्य रचितो निबन्धः सर्वस्यास्य ग्रन्थस्य रत्नमुकुटायमानो बाभासते । एतत्प्रबन्धविरचने न केवलं मुद्रिता, अपि तु अमुद्रिताः हस्तलिखि-तमातृकास्थाः, दुर्लभाश्च बहवो ग्रन्थाः एतैरवलोडिता इति वैशिष्ट्यं साकल्यं चास्य ग्रन्थस्य । काव्यतत्त्वविचारे प्राचीनार्वाचीनैः प्रतीच्यपण्डितैः प्रकटीकृतानां अभिप्रायाणां तुलनात्मकपरिशीलनमपि अत्रोपलभ्यते ।

संस्कृतालङ्कारशास्त्रप्रस्थानानां सिद्धान्तान् यथावत्सूक्ष्मेक्षिकया बुभुत्सूनां शास्त्रेऽस्मिन् कूलङ्कषपाण्डित्यप्रेप्सूनामन्येषां सारस्वतविशेषरसिकानां च महोपकारकोऽयं ग्रन्थः ॥ (डा. मु. न.)

बँगला देशः - (बँगला देशोदय - युद्धगाथा)

लेखकः डॉ. रमेशचन्द्र शुक्लः । प्रथमं संस्करणं १-७-१९७२- रू. २-५०. अलीगढ-संस्कृत-परिषद् ग्रन्थमालायाः पञ्चमं पुष्पम् । प्रकाशकः-शारदा सदन्, मुजफ़रनगर् ।

इदं काव्यं अष्टोत्तरद्विशतश्लोकैर्निबद्धं संस्कृतसाहित्ये ऐतिहासिक-निबन्धपोषकं भवति । बँगलादेश एकदा भारतभूभाग एव आसीत् । बँगलादेशवासिनः अस्मद्-बान्धवा एव । दुर्दैववशाद् विभक्ता अन्य-देशीया जाताः । तेषाम् असह्यं दुःखं यदापतितं, तद्भारतीयानां निजं दुःखमेव । तादृशेन सहृदयत्वभावेन उत्स्फुरितमिदं काव्यं यथाभूतां वस्तुस्थितिं वर्णयद् वृत्तवैविध्यादिगुणैः हृद्यम् वर्तते । भारतभूषायाः इन्दिरागांधी-महाभागायाः महनीयतामपि सर्वथा अतिनिपुणं काव्ये निबध्नाति कविः । परं तु एकोऽतीव प्रकटो दोषः, यत् कुत्रापि अस्या ऐतिहासिक्या घटनायाः तिथिवारादिकालनिर्देशो नैव वर्तते । प्रतिपाद-नशैली अपि केवला वस्तुस्थितिवादिनी । तस्माद् ऐतिहासिकदृष्ट्या अथवा काव्यालंकारदृष्ट्या किञ्चिदपूर्णमिव भाति । (सू. कु. द्वा.)

सुबोधसंस्कृतम्- द्वौ भागौ

रचयिता-श्री. रसिकलाल् ए. पारेख् । भाषान्तरकर्ता-श्री. भूपेन्द्र ही. दवे. रू. २. भारतीय विद्यामण्डल्, सूरत्, बालाजी रोड्-सूरत्. १.

अस्य पुस्तकस्य एकैको भागोऽपि द्विधा विभक्तः । प्रथमतः किंचिद् व्याकरणम् अपरतो गद्यविभागश्च दत्तः । लिङ्गं, वचनं, विभक्तिः, प्रत्ययः, क्रियापदानि, शब्दकोषः इति प्रत्येकैक-पाठस्य प्रकारो भवति । सर्वं डा. भाण्डारकराणां प्राथमिकसंस्कृतशिक्षोपयोगिपुस्तकमनुसृत्यैव वर्तते । एकस्तु विशेषोऽत्र यद् इदं सचित्रं आङ्ग्लपुस्तकमार्गमवलम्बमानं बालानां सत्यं सुबोधम् भवत्येव । पाठशालोपयोगीदं प्रकाशनम् । अधुना डा. भाण्डारकराणां पुस्तकानि मुद्रणाभावेन दुर्लभानीव जातानि । तस्माद् अस्य विशेषोपयोगिता शालायां गुरुशिष्याणां भवेत् । (सू. कु. द्वा.)

OUR CONTRIBUTORS:

अस्यां सञ्चिकायां नूतनतया दृष्टा लेखकाः—

Svayamprakasa Sarma, Sastri, M.A. 26/5, Roorkee Road Camp, Meerut Cant. U. P.

स्वयंप्रकाशशर्मा, साहित्य-ज्योतिषाचार्यः, २६/५, रूड्कीरोड्काम्प्, मीरट् कण्टोन्मेण्ट्, उ. प्र.

M. N. Joshi (Maheshwara shashtri Nagesa Joshi), M. A., Karn atak College, Dharwar

म. ना. जोशी (महेश्वरशास्त्री नागेश जोशी), कर्णाटक कालेज्, धार्वार्, क. प्र.

Vattipalli Mallinatha Sarma, Senior Telugu Pandit, M. K. R. High School, Indukurpet, Nellore Dt., A. P.

वट्टिपल्लि मल्लिनाथशर्मा, तेलुगु-आध्यापकः, एम्. के. आर्. उन्नत पाठशाला, इन्दुकूरु पोस्ट्, नेल्लूर् जिल्ला, आ. प्र.

D. G. Rama (Dr. Goparaju Rama), G. Jha Kendriya Sanskrit Vidyapitha, Allahabad-2

डा. जि. रामा (डा० गोपराजुरामा) गङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठः, प्रयागः-२

"Padma" Sastri, Chief Sanskrit Teacher, Govt. Secondary School, Mangalgadh P.O., Bhilwada Dist., Rajasthan

"पद्म"शास्त्री, वरिष्ठसंस्कृताध्यापकः, राजकीय-उच्चमाध्यमिकविद्यालयः, भीलवाडा जिल्ला, राजस्थानम्

संस्कृतप्रतिभाप्रशस्तिः

यासौ संस्कृतसाहितीमधुरसास्वादे सदा निष्ठिता
साहित्याकडमीमहापरिषदा मुद्राप्य विख्यापिता ।
आर्याः ! संप्रति संस्कृतप्रतिभया स्वस्यां प्रकाशीकृतां
शंसां वीक्ष्य मदीयबालिशकृतेः कार्तज्ञ्यमावेदये ॥

पि. नीलकण्ठशर्मा,
पाण्डिच्चेरि

STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT SAMSKRITA PRATIBHA

FORM IV

(As required by Rule 8 of Press Registrar's Act)

Place of Publication	..	7, Srikrishnapuram Street, Madras-14
Periodicity of Publication	..	Half-yearly
Printer's name and address	..	M.L.J. Press Private Ltd., 55-56, Mundakanni Amman Koil St., Madras-4
Publisher's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Editor's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Owner's Name	..	Sahitya Akademi,
Address	..	Rabindra Bhavan, Ferozeshah Road, New Delhi

I, V. Raghavan, hereby declare that the particulars given above are true to the best of my knowledge and belief.

2-3-1974

V. RAGHAVAN.
Signature of Publisher

———

INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES

Dear Sirs,

I am writing this to you in connection with the International Association of Sanskrit Studies, about the establishment of which a note is attached.

The International Association of Sanskrit Studies (IASS), with Head-Quarters in Paris, will have as its members non-Governmental organisations in the field of Sanskrit working in different countries. Accordingly, it is necessary to set up in this country an Indian Association of Sanskrit Studies which could become a member of the IASS.

It has been suggested that I, as President of the IASS, might write to all voluntary organisations in the field of Sanskrit in India, inviting them to become members of the proposed Indian Association of Sanskrit Studies and for this purpose, contribute an annual subscription of Rs. 50. After a sufficient number of members agree to become members and send their subscription, a meeting will be called at some centre in this country which might be attended by representatives of these member-organisations. All such organisations in India will form the General Body of the Association and from among them, the Executive Committee will be elected.

I invite you to join this proposed Indian Association of Sanskrit Studies and send your annual subscription of Rs. 50.

I am sure you will realise that the establishment of the IASS is a land-mark in our efforts to promote Sanskrit studies in the different countries and on an International basis. I appeal to you to co-operate in this effort.

In addition to a note on the IASS, the statutes of the IASS adopted at the meetings in the recent 29th International Congress of Orientalists in Paris is also enclosed.

Yours sincerely,

7, Srikrishnapuram Street,
Madras-600014

Dr. V. Raghavan,
President,
International Association
of Sanskrit Studies

II

The first International Sanskrit Conference organised by the Ministry of Education in New Delhi in March end 1972, resolved at the instance of some delegates from abroad that an International Association be set up for promoting Sanskrit studies. The reso-

lution endorsed by the National Commission for Co-operation with Unesco, New Delhi was forwarded to the 29th International Congress of Orientalists held in Paris from 16th to 22nd July, 1973. Three meetings of the Indological delegates from all over the world were held under the auspices of the Paris Congress. The International association of Sanskrit Studies was established and its draft statutes approved. Dr. V. Raghavan, who was Chairman of the Academic Committee of the first International Sanskrit Conference in New Delhi and who was one of the Government of India delegates to the Paris Congress, was elected President of the first committee of the International Association of Sanskrit Studies. Dr. L. Strenbach of Sorbonne, Paris, was elected Secretary-General : 5 Vice-Presidents were elected from among Sanskritists from U.S. (Prof. W. Norman Brown), U.K. (Prof. J. Brough), Holland (Dr. J. Gonda), France (Dr. J. Filliozat), U.S.S.R. (Prof. G. Bougard-Levin), and Japan (Dr. Tsuji). This International Association of Sanskrit Studies will be affiliated to the International Union of Orientalists and the International Council of Philosophical and Humanistic Studies under the aegis of the Unesco. Non-Governmental organisations in the field of Sanskrit studies in the different countries will form the members of the above International Association of Sanskrit Studies through their elected representatives.

III

STATUTES

Purpose

Article 1 It is the purpose of the International Association of Sanskrit Studies (IASS) :

a) to promote, diversify, intensify and co-ordinate Sanskrit and Sanskrit-based studies in the various countries of the world ;

b) to maintain contact with the organizing committee of the International Congress of Human Sciences in Asia and to sponsor international meetings ;

c) to assist in the organization of research, and of publications or other projects, to promote all other activities in the interest of Sanskrit and Sanskrit-based studies, and foster scholarly relations on a world-wide scale.

Article 2 The Association s a non-profit organization.

Organization

Article 3 Membership shall be open to all voluntary associations and organizations working in this field in the various countries in the world.

Seat, Legal status of the Association

Article 4

a) The seat of the Association is CIPSH.

b) The Association holds the legal status of an international association as defined by the laws of the country where it has its seat.

Organs

Article 5 Organs of the Association are the General Assembly and the Bureau.

Statutes

Article 6

a) The General Assembly is composed of the delegates of all the qualified organizations affiliated to the Association.

b) The General Assembly shall elect the Bureau of the Association. The Bureau shall consist of the President, five Vice-Presidents, the Secretary-General, two Secretaries and the Treasurer of the Association.

c) The General Assembly has the power to decide all questions concerning the business of the Association and the fulfilment of its purpose. It alone can revoke membership.

d) A Session of the General Assembly shall meet at least every second year.

The Session will be convened by the Bureau.

Bureau

Article 7

a) The Bureau shall transact the business of the Association under the authority of the General Assembly. The Bureau may submit proposals to the members for their decision.

The Bureau has the right to accept Member-Associations subject to the subsequent approval of the General Assembly.

b) The Bureau shall report its activities to the General Assembly.

c) The Bureau shall frame the by-laws and regulations for carrying on the work of the Association.

Statutes

Article 8 The President is the legal representative of the Association.

Secretary-General

Article 9 The Secretary-General, under the authority of the Bureau, represents the General Assembly in all ordinary circumstances, conducts the correspondence, prepares and distributes the documents and publications, and sees to the proper administration of the resources and to the payment of the expenses of the Association.

The Secretary-General is assisted by the Treasurer who effects payments and keeps the accounts at the disposal of the auditors of the Association. The Secretary-General shall place these accounts before the Bureau. The Secretary-General may delegate some of his functions to Secretaries residing in countries other than the one in which the Association has its seat.

Amendments

Article 10 The present statutes approved in their original form by the members assembled in the XXIXth Congress of Orientalists held in Paris in July 1973 may be amended upon demand of the Bureau by a two-third majority of the General Assembly.

POONA ORIENTAL SERIES
550 Narayan Peth, Poona-30, India

Samkhyakarika with Gaudapadabhasya, English notes, trans, introduction. II revised edn. by Dr. T. G. Mainkar, 1972. paper **Rs. 18 00** half cloth	**Rs.**	**25**	**00**
Tatt akaumudi of Vachaspāti on Samkhya Karikas introduction, English notes, trans. by Dr. Ganaganath Jha. paper **Rs. 16 00** half cloth	**Rs.**	**20**	**00**
Ksemendra Studies — trans. of Kavikanthabharana, Suvrttatilaka, Aucityvicaracarca by Dr. Suryakanta with introduction, life of Ksemendra	**Rs.**	**16**	**00**
Rastrakutas and Their Times — Dr. A. S. Altekar —	**Rs.**	**20**	**00**
Ghate's lectures on Rgveda	**Rs.**	**10**	**00**
Chaurapancasika of Bilhana — with tran.	**Rs.**	**5**	**00**
Brahmasutra-catussutri with Sankarabhasya, notes trans. by Dr. H. D. Sharma	**Rs.**	**8**	**00**
Amarakosa — with English equivalents, index.	**Rs.**	**9**	**00**
Prof. P.K. Gode Commemoration Volume - 103 research articles presented to Dr. Gode.	**Rs.**	**70**	**00**
Dr. Ganganath Jha Commemoration Volume	**Rs.**	**50**	**00**
Prof. P. V. Kane Commemoration Volume	**Rs.**	**50**	**00**

OF INTEREST TO

RAMAYANA & BHAGAVATA DEVOTEES

Srimad Bhagavatam: Text in Sanskrit with word for word Tamil Translation: 6 Skandhas ready. Rest in rapid print.

Srimad Bhagavatam: Full Text in Malayalam in 4 vols. Rs. 25 00

Bhagavata Kathamritam: in easy Tamil Prose in 2 parts 9 00

Bhagavata Samgraham: in Tamil-Hand Book of 80 pages 1 50

Similar **Ramayana** Texts with Tamil word for word meaning also available.

Ramayana Triveni: A Study of Valmiki, Kambar and Tulasidas by Dr. V. Raghavan 2 00

RAMAYANA PUBLISHING HOUSE
10-G, EDWARD ELLIOTS ROAD
MADRAS-600 004

साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

कालिदासग्रन्थाः—

बहुमातृकापरिशोधनपूर्वं नूतनतया सम्पादिताः सोपोद्घाताः सटिप्पणाः ।

१. मेघदूतम्—सु. कु. दे.—विशिष्टं संपुटीकरणम्—
$ 1-50, 10 Sh. 6 d. Rs. 5. 00; साधारणम्—Rs. 2-50.
द्वितीयावृत्तिः डा. वे. राघवेन सम्पादिता Rs. 6-50.

२. विक्रमोर्वशीयम्—ह. दा. वेलणकरः—वि.सं. $ 3-00, 21 Sh. Rs. 8-00; सा. Rs 6.

३. कुमारसम्भवः—सूर्यकान्तः—वि.सं. $ 5-00, 37 Sh., Rs. 12-50; सा. Rs. 10. 00.

४. अभिज्ञानशाकुन्तलम्—एस्. के. बेल्वाल्कर् सा. Rs. 5. 00.

मुद्र्यमाणानि अथवा सम्पाद्यमानानि

५. मालविकाग्निमित्रम्—के. ए. एस्. अय्यर्

६. रघुवंशः—वे. राघवः

७. ऋतुसंहारः—पि. एम्. लाड्—वे. राघवः

कोशावलिः—

१. पुराणेतिहाससंग्रहः—सु. कु. दे—रा. च. हस्रा—वि. सं. $ 4-00, 25 Sh., Rs. 10-00 ; सा. Rs. 7-50.

२. बौद्धसंग्रहः—नलिनाक्षदत्तः—वि. सं. $ 4-00, 25 Sh., Rs. 10-00; सा. Rs. 7-50.

३. अभिलेखसंग्रहः—ब. च. छाब्रा
वि. सं. Rs. 8-50, सा. Rs. 7-00.

४. वेदशास्त्रसंग्रहः—वि. ब. शास्त्री. Rs. 15-00.

५. काव्यनाटकसंग्रहः—१ भागः—वा. श. अग्रवालः—वे. राघवः वि. सं. Rs. 12-00.

६. सुभाषितसंग्रहः-१ भागः—के. ए. एस्. अय्यर्

अन्यत् प्रकाशनम्

७. अशोकावदानम्—सु. कु. मुखोपाध्यायः
वि. सं. Rs. 8-50, सा. Rs. 7-00.

८. संस्कृतरवीन्द्रम्—सं. वे. राघवः Rs. 12-50.

मुद्र्यमाणा अथवा सम्पाद्यमानाः

९. काव्यनाटकसंग्रहः—२ भागः—वे. राघवः

१०. जैनसंग्रहः—ही. ला. जैनः

११. सुभाषितसंग्रहः-२ भागः—वे. राघवः

IMPORTANT PUBLICATIONS OF THE
GANGANATHA JHA KENDRIYA SANSKRIT VIDYAPEETHA
MOTILAL NEHRU PARK
ALLAHABAD-2 (INDIA)

		Rs.	P.
1.	Sanskrit Documents in the National Archives of India Edited by Dr. S. N. Sen and Mm. Dr. Umesh Mishra ..	15	00
2.	Mimamsa Jurisprudence : The Sources of Hindu Law by Shri A. S. Nataraja Aiyyar, M.A.M.L. ..	4	00
3.	Pratimoksa Sutra of the Mahasanghikas. Edited by Dr. W. Pachow, Ph.D. and Ramakanta Mishra, M.A..	5	00
4.	Modern Assamese Literature by D. Neog ..	6	00
5.	Quarterly Journal of the Ganganatha Jha Research Institute. Back Vols. I, II, III & VIII to XXVIII (Outside India) per Volume ..	100	00
	(Inside India) per Volume ..	50	00
6.	Annual Membership for current Volume of the above Journal. (Outside India) per Volume ..	50	00
	(Inside India) per Volume ..	25	00
7.	Manusmrti with Manu Bhasya of Medhatithi. Edited by Mm. Ganganatha Jha Vols. I, II & III ..	125	00
8.	Umesha Mishra Commemoration Volume : ..		
	(Outside India) ..	175	00
	(Inside India) ..	115	00
9.	Descriptive Catalogue of Sanskrit Manuscripts. Compiled by Mahamahopadhyaya Dr. Umesh Mishra, M.A., D.Litt. Vol. I Part I ..	25	00
	Vol. I Part II ..	35	00
10.	-do- (Vol. II Parts I and II are under print).		
11.	Mahakalasamhita (Kamakalakhanda) ..	30	00
12.	Pt. K. C. Chattopadhyaya Felicitation Vol. 2 Parts		
	(Outside India) ..	110	00
	(Inside India) ..	55	00

PUBLICATIONS OF THE ALL-INDIA KASHIRAJ TRUST

Fort Ramnagar, Varanasi

1. PURANA : Half-yearly Bulletin for Puranic studies and research. Rs. 18-00 or £ 1.50 per year.

2. VAMANA PURANA : Critical edition based on 21 mss. by Prof. Anand Swarup Gupta. Has Introduction, Constituted Text and Critical Apparatus and several concordances and Indexes. Demy quarto, pp. ixx, 778, 97. Rs. 125-00

3. VAMANA PURANA ENGLISH TRANSLATION : With the constituted Sanskrit Text and Introduction, etc. Same size, pp. 1, 543, 70, 97. Rs. 80-00.

4. VAMANA PURANA WITH HINDI TRANSLATION : With the constituted Sanskrit text, Introduction etc. Same size pp. xi. 465, 55, 97. Rs. 50-00.

5. RAMACARITA-MANASA : of Tulasidasa. Critical edn. based on a numbei of old mss. written within 100 years of author's death. By Prof. Vishwanath Prasad Misra. Rs. 6-50., Library Edn. Rs. 15-00.

6. DEVI MAHATMYA : Annotated edn. with English translation. Text primarily based on an old Nepali Ms. Symbolical and cultural significance explained By Dr. V. S. Agrawala. Rs. 10-00, Library Edn. Rs. 15-00.

7. MATSYA PURANA — A STUDY : By Dr. V. S. Agrawala. Interpretation of the Purana on the Vedic background and in the light of the cultural, geographical and historical material in the Purana. Rs. 30-00.

8. SVARGA-KHANDA OF PADMA PURANA : Critical edn. by Prof. Asoka Chatterjee based on 7 mns. in Bengali characters. Rs. 40-00.

9. VYASA PRASASTI : Compiled and edited by Dr. V. Raghavan from the Mahabharata, Puranas etc., with concordance of the Vyasas of different ages. Re. 1-00.

10. NITI SECTION OF THE PURANARTHA-SAMGRAHA : Edited with Introduction and Notes by Dr. V. Raghavan. Rs. 2-00.

11. VISNU-PURANA — VISAYANUKRAMANI (SUBJECT-INDEX OF VISNU-PURANA IN SANSKRIT) : By Pt. Madhavacharya Adya. Rs. 5-00.

12. A NEW ABRIDGED VERSION OF THE BRHASPATI SAMHITA OF GARUDA PURANA : Critical edn. with Introduction, critical notes and Appendix by Dr. L. Sternbach. Rs. 10-00.

13. GARUDA PURANA: A Study by N. Gangadharan, M.A., M.Litt. Rs. 40-00

14. KURMA PURANA : Critically edn. by Anand Swarup Gupta. Carries also Introduction, Concordances etc. Demy quarto. Pages lxxi, 842, 99. Rs. 125-00.

15. KURMA PURANA: ENGLISH AND HINDI TRANSLATIONS: with concordances Indexes etc. English Rs. 80-00 Hindi Rs. 50-00.

16. THE GREATER RAMAYANA: By Dr. V. Raghavan. A critical account of the Rama Story in the Mahabharata, Harivamsa, the Puranas and Upapuranas, with reference to their relation and differences with Valmiki. With Indexes. Pp. 91. Rs. 25-00 Library Edn. Rs. 30-00

Available also from standard Oriental Book-sellers.